# सप्तमः सर्गः।

[1] [पूर्वसर्गे नले[2] दूतत्वेऽङ्गीकृते सति अदृश्यतया [3] सकलमप्यन्तःपुरपुरन्ध्रिजनं नलमुखेन दमयन्तीं च निर्वर्ण्य /ल चतुर्णामिन्द्रादिदिक्पालानां दूतीनां वचनानि इन्द्रदूत्योपलक्षणेन[4] वर्णयित्वा तासां प्रत्युत्तरं दमयन्तीमुखेन निर्वर्ण्य अदृश्यस्यैव च नलस्य मुखेन केशादारभ्य नखपर्यन्तं दमयन्तीं विवर्णयिषुः कविः/षुः सप्तमं सर्गमारभते ।]

अथ प्रियासादनशीलनाद्यो मनोरथः पल्लवितः पुरा सः। विलोकनेनैव स राजपुत्र्याः पत्या भुवः पूर्णवदभ्यमानि ॥१॥

[अथ[1] प्रियासादनेति। अथ इन्द्रदूतीनिराकरणानन्तरं भुवः पत्या नलेन स मनोरथो राजपुत्र्या[2] दमयन्त्या विलोकनेनैव[3] पूर्णवदभ्यमानि अमन्यत। प्रायः[4] षष्ठीतत्पुरुषस्तनोऽग्रे, राजभोज- मेरुदुहितुः पुत्रट् वा (under पा० ४.iii.३०) इति वार्त्तिकवचनात् अत्र[5] दुहितृ- शब्दस्य विभाषया पुत्रट् आदेशः। तथैव च माघकालिदासप्रभृति- भिरन्यैरपि वैयाकरणाभिमानिभिः प्रयुक्तः। केवलं पुनः षष्ठीतत्पुरुष- व्यतिरेकेण 'न मे गोत्रे पुत्री (शार्ङ्ग० ३७६) त्यादिवद्व्याकरणाभिमानिनां पुत्रीशब्दप्रयोगः। तथा कवित्वाभिमानिनां न[6] इष्टः। केचित्तु गौरादिषु

1 B इदानीं सप्तमः सर्गः प्रारभ्यते। 2 P1 नलेन 3 R om. ०पुर० M P2 om. इन्द्रदूत्योपलक्षणेन

1 P1 अथ। 2 P1 राजपुत्र्यां दमयन्त्यां 3 P1 om. विलोकनेनैव 4 P1 om. प्रायः तत्पुरुष० 5 P2 om. अत्र 6 P1 om. न

## सर्ग ७

2

कुमारशब्दं पठन्ति। यो मनोरथः प्रियाया आसादनशीलनादौ च पुरा पल्लवितः। पल्लवितश्चिरं [7] यः इति पाठान्तरम्। प्रियायाः कथमासादनशीलनादि भवेत्। आसादने प्रियाया इत्थं करिष्यामि। परिचये च [8] अमुकं करिष्यामीति पल्लवितोऽभूत् [9] ॥१॥

प्रतिप्रतीकं प्रथमं प्रियायामथान्तरानन्दसुधासमुद्रे।
ततः प्रमोदाश्रुपरम्परायां ममज्जतुस्तस्य दृशौ नृपस्य ॥२॥

[1] प्रतिप्रतीकमिति। तस्य नृपस्य [2] दृशौ दृष्टी [3] प्रथमं पूर्वं [4] [5] प्रियायां विषये प्रतिप्रतीकं [6] प्रत्यवयवं ममज्जतुः। अथ पश्चात् [7] आन्तरोऽन्तर्वर्ती य आनन्दः स एव सुधासमुद्रस्तत्र मग्ने। ततोऽ[8]नन्तरं प्रमोदाश्रुणः परम्परायां ममज्जतुः। आनन्दाश्रुणि प्रियादर्शनात् य[9] आनन्दस्तस्माद् [10] अश्रुपरम्परा जाता ॥२॥

श्लाघ्यहृदयस्याऽन्वभवत्प्रमोदं रोमाग्र एवाऽग्रनिरीक्षितेऽस्याः।
यथौचितीत्थं तदशेषदृष्टावथ स्मराद्वैतमुदं तथाऽसौ ॥३॥

[1] श्लाघ्यहृदयस्येत्यादि। स नलः अस्या रोमाग्रेऽग्रे [2]-

7 B om. पल्लवित.. भवेत् 8 B om. च 9 P. add. अत्र तेन विलोकनेन आसादनशीलनादिमनोरथपूर्णतालक्षणं गुरुकार्यकारीति विपुलेन (कार्य [illegible]) सागरश्रेष्ठस्य कुक्षिणेत्यादिवद्विषमः। उपजातिवृत्तम्। उपमा च ॥१॥

1 P. प्रति। 2 B नलस्य 3 P. P2 om. दृष्टी 4 P. P2 om. पूर्वं 5 B प्रियायां विषये alt. पश्चात् 6 B प्रत्यङ्गम् अङ्गमङ्गं प्रति 7 B आनन्दसुधासमुद्रे अन्तरा मध्ये ममज्जतुः 8 B तदनन्तरं 9 P. P2 om. य 10 P. P2 तदनन्तरम्॥

1 P. श्लाघ्या। P2 श्लाघ्यहृदयस्येति ॥ 2 P. om. अग्रभागे एव अग्रे —

सर्ग ७ 3

भागे [इव अग्रे] प्रथमं निरीक्षिते सति ब्रह्माद्वयस्य प्रमोदमन्वभवत्। एकमेवा[द्वि]तीयं ब्रह्म (छा० उ० ६.२.२) इत्यस्मिन्[3] विषये दृशोर्[4] याद्दृक् महानन्दो भवति तादृग् जातः। अथ रोमाग्र[5]निरीक्षणादनन्तरं क्रमेण तस्या[6] अशेषाया: सर्वावयवपूर्णाया अवयविन्या दृष्टौ सत्याम् असौ नलस्तन्मयत्वात्[7] [तथा] स्मराद्वैतमुदम् अन्वभवत्[8]। कामाद्वैतानन्दमन्वभवत्। यथा इत्थम् औचिती[9] औचित्यम्। इत्थं परिगणनया रोमाग्रदर्शने ब्रह्मानन्दैकपरिगणनया सर्वावयवानां ब्रह्मानन्दस्य एकत्र मेलने याद्दृश:[10] कामाद्वैता[11]नन्द उचितो महान्[12] भवति, अनुभवात्[13], [तावान्] कामाद्वैतानन्दो बभूव।[14] सर्वे कामास्तद्दर्शनेन[15] समाप्ता:। केचित्तु — किं पुन: न्यायेन व्याचक्षते। सर्वेभ्योऽ[16]प्यद्वैतानन्देभ्य: ब्रह्मानन्द उत्कृष्ट:। रोमाग्र एव दृष्टे ब्रह्माद्वैतानन्दोऽनुभूत:। अत इत्थं यथौचिती उचितमेव। किमु वक्तव्यं — यत् तदशेषदृष्टौ कामाद्वैतानुभव इति[17] ॥३॥

---

वेलामतिक्रम्य पृथुं मुखेन्दोरालोकपीयूषरसेन तस्या:।
नलस्य रागाम्बुनिधौ विवृद्धे तुङ्गौ कुचावाश्रयत: स्म दृष्टी ॥४॥

---

3 P, P2 om. विषये 4 B दृशोर्यो 5 P, P2 om. निरीक्षणात् 6 B अस्या 7 P, P2 om. तन्मयत्वात् 8 P2 अन्वभूत् 9 P2 औचित्यम् औचिती 10 B यो दृश: 11 B ०द्वैतानो 12 B महानन्दो 13 P, P2 om. अनुभवात् 14 P2 om. सर्वे.... अत इत्थं य० 15 P, ०दर्शने 16 P, om. अद्वैत० वक्तव्यं om. ब्रह्मानन्द ...... एव दृष्टे 17 P, add. एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति (बृ० IV.iii.32) इति श्रुते: समस्तानन्दाश्रयस्य ब्रह्मानन्दस्याद्वैतस्य महत्त्वे तदपेक्षया तनोरपि। स्मराद्वैतानन्दस्य महीयस्त्वमित्यधिकम्। द्वितीय व्याख्याने तु रोमाग्रमात्रनिरीक्षणकारे स्वल्पब्रह्मानन्दानुभवस्य गुरुत्वमिति विषममेव पूर्वव्याख्याने विषममधिकं च। अनुप्रासोऽपि ॥३॥

सर्ग ७ 4

वेलामतिक्रम्येत्यादि। तस्या मुखेन्दोः आलोकपीयूषरसेन नलस्य रागाम्बुनिधौ विवृद्धे सति दृष्टी तुङ्गौ कुचौ आश्रयतः स्म। [किं कृत्वा] विवृद्धे। [दृष्टी] वेलामतिक्रम्य। यथा समुद्रे उद्वेलिते सति स्थलम् आश्रीयते तथा तस्य अनुरागे विवृद्धे कुचदर्शनं समजनि॥ ॥४॥

मग्ना सुधायां किमु तन्मुखेन्दोर्लग्ना स्थिता तत्कुचयोः किमन्तः।
चिरेण तन्मध्यममुञ्चताऽस्य दृष्टिः कृशीयःस्खलनाद्भिया नु॥५॥

मग्ना सुधायामित्यादि। अस्य दृष्टिः तस्या मध्यमुदरं चिरेणाऽमुञ्चत। किं भूतम्?। कृशीयः कृशतरम्। उत्प्रेक्षते - स्खलनात् [पतनात्] भिया। नु वितर्के। यत्किल दुर्बलं स्थानं भवति तत्र तिष्ठतां पतनभयं भवति। अतस्तत्र चिरं स्थित्वा मध्यम् अमुञ्चत। (106 a) किमु तस्या मुखेन्दोः सुधायां मग्ना स्थिता। ~~स्थिता~~ [अतश्च मज्जनेन व्याकुलिता। तत्राऽऽगत्य चिरं स्थिता। तथा किमु तस्याः कुचयोरन्तर्लग्ना स्थिता] सती तत्र क्वाऽपि विलग्नत्वात् व्याकुलिता सती उदरे आगत्य चिरेण तदमुञ्चत। यः प्रथमं क्वाऽपि मग्नो भवति। तदनु [चि] क्वाऽपि लग्नो भवति। ततश्च तृतीयस्थाने गतः सन् श्रान्तत्वात् स्खलनभयेन चिरेण तन्मुञ्चति। तदपि स्थानं कृशीयः। अथवा, पादद्वयेनाऽधिकार्थान्तरविवक्षया पूर्वा-

1 P. वेला।; R वेलामतिक्रम्येति। 2 P. add. मुखेन्दोरारभ्य पदपर्यन्तं दम-
चन्तीदर्शनं समासेन प्रक्रमे; R अस्याः 3 P. उद्वृद्धे R वद्धे M. R om.
सति 5 P. add. सति 6 P. add. लेखो रूपकमतिशयोक्तिश्च॥४॥
1 B मुग्धा सुधायां; P. मग्ना।; R मग्ना सुधायामिति। 2 P. कथंभूतम्?।
3 R add. इति 4 R स्थिरं 5 B तासीत 6 R यतः 7 P. om. तत्
8 B तदव° 9 B पद° 10 P. om. अधि°

सर्ग ७ 5

नुवाद: । किमु अस्य दृष्टि: तन्मुखेन्दो: सुधायां मग्ना । मुखे चिरं स्थिता ।
त्स्यार्थ: ।[1] तथाऽस्य दृष्टि: तत्कुचयोरन्तर्लग्ना स्थिता । तत्राऽपि
चिरं स्थिता । तथा [2] तदुदरमपि स्खलन[भयात्] चिरममुञ्चत् । यत:
कृशोऽयं[3] ॥ ५ ॥

प्रियाङ्गपान्थी कुचयोर्निवृत्य निवृत्य लोला नलदृग्भ्रमन्ती ।
बभौ तमां तन्मृगनाभिलेपतम: समासादितदिग्भ्रमेव ॥ ६ ॥

[1]प्रियाङ्गपान्थीत्यादि [2] नलस्य दृक् निवृत्य निवृत्य पुन:
पुन: कुचयोर्भ्रमन्ती सती बभौतमाम् यतो लोला । किंभूता ? प्रियाया
अङ्गेषु पान्थी सञ्चरणशीला पथो [3]णं नित्यमिति णः अर्थे
णप्रत्यय: । उत्प्रेक्षते-तयो: कुचयो[4]र्यो मृगनाभे: कस्तूरिकाया लेप:
स एव [5]तमो ऽन्धकारं तेन समासादितो दिग्भ्रमो यया सा तथा ॥[6]६ ॥

विभ्रम्य तच्चारुनितम्बचक्रे दूतस्य दृक्तस्य खलु स्खलन्ती ।
स्थिरा चिरादास्त तदूरुरम्भास्तम्भावुपाश्लिष्य करेण गाढम् ॥ ७ ॥

[1]विभ्रम्य तादिति । तस्य दूतस्य दृक् तस्या [ऊरू] एव
रम्भास्तम्भौ [2]तौ करेण नयनकिरणेन गाढमुपाश्लिष्य चिरात् स्थिरा
आस्त । ऊरुदेशं विलोकयामास । खलु उत्प्रेक्षते । तस्याश्चारुणि
नितम्बचक्रे विभ्रम्य स्खलन्ती इव । य: किल चक्रे भ्रमित्वा स्खलति,

1 B तथाऽपि 2 B तदुदरमध्ये ; P. तन्मध्यं तदुदरमथापि 3 P. add. अनुप्रास उत्प्रेक्षा रूपकं च हेतुरपि ॥ ५ ॥ 1 P. प्रियाङ्गेत्यादि । P 2 प्रियाङ्गपान्थीति । 2 B add. तस्य 3 B णमिति 4 P. om. यो 5 P. om. तम: 6 P. add. रूपकमुत्प्रेक्षा ॥ ६ ॥/1 P. विभ्रम्य । 2 P. om. तौ

सर्ग ७ 6

स स्तम्भिहस्तेनाऽऽलम्बते[3] ॥७॥

---

वासः परं नेत्रमहं न नेत्रं किमु स्वमालिङ्ग्य तन्मयाऽपि।
उरोनितम्बोरु कुरु प्रसादमितीव सा तत्पदयोः पपात ॥८॥

---

[1] वासः परमित्यादि। सा [2] दृष्टिः इतीव तस्याः [3] पदयोः पपात। [4] इतीति किम्? किमु परं केवलं वासः वस्त्रमेव नेत्रम् अहं दृष्टिः किं न नेत्रम्[5]? अपि तु[6] नयनम्। नेत्राभिधानं वस्त्रं च। तन्मयाऽपि[7] स्वम् आत्मीयम् उरोनितम्बोरु त्वम्[8] आलिङ्ग्य। समाहारद्वन्द्वत्वान्नपुंसकत्वम्। द्वन्द्वश्च प्राणितूर्यसेनाङ्गानामि(पा० II iv. 2) त्येकवचनम्। हे दमयन्ति! प्रसादं कुरु। ~~मत्~~ दृष्टिः उरःप्रभृतिकमालिङ्गतु। नेत्रत्वात् यथा नेत्रं तत्तदुरःप्रभृतिकम् आलिङ्गति। [9] यथा नेत्रं वस्त्रं तथा चेदमपि नेत्रम्। तस्मादुरःप्रभृति आलिङ्गतु। उरसि नेत्रमयं कञ्चुकं, नितम्बे ऊर्वोश्च नेत्रस्य[10] परिधानम्। इत्थं तेषामालिङ्गनं नेत्रस्य। अहम् उरो[नितम्बोरु] आलिङ्गामि। त्वं यथा [11] उरो[नितम्बोरु] आलिङ्ग्य। आनिनन्तकर्तुरस्मच्छब्दवाच्यस्य इनन्ते सति, अनिनन्तकर्तृत्वात् अनुक्ते [कर्तरि] तृतीया[12] ॥८॥

---

3 P1 add: अनुप्रासो रूपकमुत्प्रेक्षा पर्यायश्च। करोतीति क्लिष्टम् ॥७॥
1 P1 वासः।; P2 वासः परमिति। 2 B P2 दृष्टिः aft. पपात 3 B P1 पादयोः 4 P1 इति किम्। 5 P1 add. अहम् 6 P1 om. तु 7 P1 om. अपि 8 P2 add. मया 9 P2 om. यथा ... आलिङ्गतु। 10 P1 om. नेत्रस्य 11 P1 उरःप्रभृतिकम् 12 P1 add उत्प्रेक्षाऽनुमानपि। नेत्रं पपातेति क्लिष्टम्। पदयोः पपात वा प्रणता च ॥८॥

सर्ग ७ 7

दृशोर्यथाकाममथोपहृत्य स प्रेयसीमालिकुलं च तस्याः ।
इदं प्रमोदाद्भुतसंभृतेन महीमहेन्द्रो मनसा जगाद ॥ ९ ॥ ।म्रि

दृशोर्यथाकाममित्यादि[1] । अथ स महीमहेन्द्रो नलः मनसा इदं जगाद । किंभूतेन ? । प्रमोदेन अद्भुतेन च सम्भृतेन । किं कृत्वा ? । प्रेयसीं दमयन्तीं तस्या आलिकुलं च दृशोर्नयनयोर्[2] यथाकामम् उपहृत्य ढौकयित्वा[3] ॥ ९ ॥

पदे विधातुर्यदि मन्मथो वा ममाभिषिच्येत मनोरथो वा ।
तदा घटेतापि न वा तदेतत् प्रतिप्रतीकाद्भुतरूपशिल्पम् ॥ १० ॥

पदे वि(1066)धातुरित्यादि[1] । यदि विधातुर्ब्रह्मणः पदे स्थाने मन्मथो वा अभिषिच्येत वा अथवा मम मनोरथोऽभिषिच्येत, तदा [तत्] एतत् प्रतिप्रतीकं प्रत्यवयवम् अद्भुतरूपस्य[2] शिल्पं निर्माणं घटेत[3] । अपि[4] सम्भावने । वा अथवा न घटेत[5] । कामस्य वा मन्मनो-रथस्य[6] वा कुर्वतः इयं रूपसृष्टिर्घटते वा न वा । ब्रह्मणः पुन[र्न] घटते[8] एव[9] ॥ १० ॥

तरङ्गिणी भूमिभृतः प्रसूता जानामि शृङ्गाररसस्य सेयम् ।
लावण्यपूरोऽजनि यौवनेन यस्यां तथोच्चैस्स्तनता घनेन ॥ ११ ॥

1 P₁ दृशो; P₂ दृशोर्यथाकाममिति । 2 P₂ om. नयनयोः 3 P₁ add. अनुप्रासः समुच्चयोऽपि । प्रेयस्यालिकुलयोः प्रमोदाद्भुताभ्यां चेति क्रमेण समन्वय-स्तदा यथासङ्ख्यमपि ॥ ९ ॥ // 1 P₁ पदे विधातुः; P₂ पदे विधातुरिति । 2 B P₂ अद्भुतं 3 P₁ घटते 4 P₂ अपि 5 P₁ घटते 6 P₁ मनोरथस्य 7 P₂ तथा 8 P₁ घटते न 9 P₁ add. अनुप्रासोऽतिशयोक्तिः ॥ १० ॥

सर्ग ८ 8

तरङ्गिणीत्यादि[1]। अहं जानामि शङ्के। सा इयं दमयन्ती [2]भूमिभृतो राज्ञः सकाशात् [3]प्रसूता शृङ्गारस्य[4] रसस्य तरङ्गिणी नदी। यस्यां[5] यौवनेन लावण्यपूरोऽजनि। किंभूतेन? घनेन बहुलेन। तथा उच्चैस्स्तनताऽजनि[6]। [[7]अथ वा तथा अनिर्वचनीयम् उच्चैःस्तनतया घनेनेति यौवनविशेषणम्। भूमिभृत इति, भुवः प्रभव (पा० १।४।३१) इत्युपादानम्।] अथ[8] च पर्वताज्जाता[9] नदी या भवति सा रसस्य उदकस्य तरङ्गयुक्ता (च) भवति। तस्यां च[10] पूरो जन्यते। घनेन किं कुर्वता? उच्चैरतिशयेन स्तनता गर्जता[11]॥११॥

अस्यां वपुर्व्यूहविधानविद्यां किं द्योतयामास नवां स कामः।
प्रत्यङ्गसङ्गस्फुटलब्धभूमा लावण्यसीमा यदिमामुपास्ते ॥१२॥

अस्यां[1] वपुरित्यादि। अस्यां दमयन्त्यां विषये स कामः किं नवाम्[2] अपूर्वां वपुषो व्यूहो रचना तस्य विधानविद्यां द्योतयामास। यत् लावण्यसीमा प्रकर्षः इमां दमयन्तीम् उपास्ते। किंभूता? प्रत्यङ्गं[3] अङ्गेन स्फुटं लब्धो भूमा बाहुल्यं यया सा तथा। [[4]अस्यां द्योतितायां वपुर्व्यूहविधानविद्यायां[5] लावण्यसीमभूम्नश्च साधनत्वम्।] [6]यत्र किल काचिद्विद्या भवति सोऽन्यैरुपास्यते[7] ॥१२॥

1 P₁ तरं; P₂ तरङ्गिणीति। 2 P₁ भूभृतो 3 P₁ add. प्रभूता 4 P₁P₂ शृङ्गाररसस्य 5 P₂ अस्यां 6 B गर्जना 7 BP₂ om. अथवा... इत्युपादानम् 8 B यथा 9 P₁ प्रसूता या 10 P₁ घनेन मेघेन here 11 P₁ add. चारूपकमातिशयोक्तिश्चाश्लेषेऽपि ॥११॥ 1 P₁ अस्यां; P₂ अस्यां वपुरिति। 2 P₂ नवां 3 P₁ प्रत्यङ्गसङ्गेन 4 ~~B~~ P₂ om. अस्यां द्योतितायां 5 P₂ विद्यायाः साध्यत्वं 6 B यस्य 7 P₁ add. नवामवाप्तां यामिति पाठे लावण्यसीमा अस्यां नवामवाप्तां वपुर्व्यूहविधानविद्यां किं प्रकटीचकार। यत् लावण्यसीमा इमां दमयन्तीमुपास्ते। कीदृगित्याह — प्रत्यङ्गसङ्गस्फुटलब्धभूमा — इदं विद्याप्रकटनविशेषणं दमयन्त्यां वपुर्व्यूहविधानविद्यां द्योतयामासेति लावण्यसीमामुपास्ते इति वचनम्। अनुमानमनुप्रासश्च ॥१२॥

सर्ग ८ 9

जम्बालजालात् किमकर्षि जम्बूनद्या न हारिद्रनिभप्रभेयम् ।
अप्यङ्गयुग्मस्य न सङ्गचिह्नमुन्नीयते दन्तुरता यदत्र ॥१३॥

जम्बालजाला[1]दिति । इयं दमयन्ती जम्बूद्वीपस्य जम्बू- ~~वृक्षस्य~~ वृक्षस्य [फलरसनद्या] जम्बालजालात् कर्दमसमूहात् किं न अकर्षि आकृष्टा[2] । किं भूता[3] । हारिद्रेण हरिद्रायुक्तेन निभा सदृक् प्रभा यस्याः सा तथा ।[4] हारिद्रं सुवर्णं वा । यत्[5] अत्रास्यां[7] दमयन्त्यां दन्तुरता विषमता न उन्नीयते न साध्यते न दृश्यते । किंभूता । अङ्ग-युग्मस्यावयवद्वयस्य सङ्गः[8] संयोगः तस्य चिह्नमपि । यत्र यत्र वैषम्यं तत्र तत्राङ्गद्वयसङ्गः । कर्दमात्[9] यथाऽऽकृष्यते वेगेन, तत्र विषमोन्नतत्वं न भवति[10] ॥१३॥

सत्येव साम्ये सदृशाद्विशेषाद् गुणान्तरेणोच्चकृषे यदङ्गैः ।
अस्यास्ततः स्यात्तुलनाऽपि नाम वस्तु त्वमीषामुपमाप्रमानः ॥१४॥

सत्येव[1] साम्य इत्यादि । अस्या अङ्गैर्मुखपाणिपाद-चक्षुःप्रभृतिभिः अशेषात् सदृशात्[2] चन्द्रस्फोत्पलपङ्कजनीलोत्पलादे[4]-र्वस्तुनः सकाशात् यद्गुणान्तरेण अधिकेन विशेषाह्लादकत्व-विशिष्टसौरभ्यादिना गुणेन असाधारणेनैव [वा] केनाऽपि गुण-विशेषेण उच्चकृषे उत्कर्षैर्यज्जातं तच्चावत् साम्ये सत्येव उच्चकृषे । कु

1 P1 जम्बाल । 2 P2 add. अपि लोकष्टा 3 P1 किं भूतेन ? 4 P1 add. हरिद्रा-खण्डं वा काञ्चनयाः 5 B यतः 6 P1 om. अत्र 7 P1 P2 om. दमयन्त्यां 8 P1 P2 संयोगः 9 P1 add. यत् 10 P1 add. अनुप्रासोऽनुमानं च ॥१३॥
1 P1 सत्ये ; P2 सत्येव साम्य इति । 2 P2 om. सदृशात् 3 P1 om. चन्द्र 4 P1 P2 त्पलादिवस्तुनः 5 B विशेषकादङ्गान्तरत्वमात्रेण सौरभ्यादिना 6 P1 साधारणेनैव

यत् आल्हादकत्वमात्रेण साधारणेन गुणेन उभयोरपि साम्यमस्ति। विशिष्टेनोत्कर्षः। अपिशब्दो दुचौ। नामशब्दोऽभ्युपगमे। ततः[7] कारणात् अमीषामङ्गानां सदृशेन वस्तुना सह तुलनाऽपि स्यात् भवतु। (यत्किल यस्मादुत्कृष्टं भवति [तत् प्रथमं कियद्भिर्गुणैः समतां प्राप्य पश्चादुत्कृष्टं भवति।] यथा वेगवत् अश्वद्वयं कतिचित् काल[8] समं जवं विधाय पश्चादेको धीर्य(१०७७)ते।[9] अपर उत्कृष्यते। यथा बहुसङ्ख्या पञ्च यावत् समा, एकेनाऽधिका च[10]। तु पुनः अमीषां वस्तुसदृशां चन्द्रादिकम् उपमा उपमानं यत् स अपमानः[11]। उत्कृष्टस्य व्यतिरेके सति निकृष्टम् उपमानम् अपमानः। यतः प्रसिद्धसाधर्म्यादप्रसिद्धस्य साधनमुपमानं; प्रसिद्ध[12] तत् यदुत्कृष्टं निकृष्टमप्रसिद्धम्[13]॥१४॥

---

पुराकृतिस्त्रैणमिमां विधातुमभूद्विधातुः खलु हस्तलेखः।
येयं भवद्भाविपुरन्ध्रिसृष्टिः साऽस्यै यशस्तज्जयजं प्रदातुम्॥१५॥

---

पुराकृतीत्यादि[1]। खलु इत्यहं मन्ये। विधातुः ब्रह्मणः[2] पुराकृति[3] पूर्वरचितं स्त्रैणं स्त्रीसमूहः इमां दमयन्तीं विधातुं हस्तलेखः[4] हस्तोल्लेखोऽभूत्। तेन हि अभ्यासो भवति। (पुराकृत स्त्रैणेति पाठान्तरम्[5])। या पुनरियं भवतीनां वर्तमानानां भाविनीनां भविष्यन्तीनां[6] पुरन्ध्रीणां सृष्टिः सा अस्यै दमयन्त्यै तज्जयजं[7] तासां सर्वासां स्त्रीणां जयाज्जातं यशः प्रदातुम्[8]॥१५॥

---

7 P2 ततः 8 P1 P2 कालंकालतो: 9 B हियते 10 P1 अपि 11 P1 add. उपमाया अपमान इति वा 12 P1 om. प्रसिद्धम् 13 P1 add. अनुप्रासः प्रतीपं च॥१४॥

1 P1 पुरा; P2 पुराकृतीति। 2 P1 P2 om. ब्रह्मणः 3 B पुराकृत: 4 P1 अभूत् हस्तोल्लेखो बभूव 5 P1 यतः स्त्रैणेति 6 P2 भविष्यन्तीनां 7 P1 P2 om. तज्जयजं 8 P1 add. अनुप्रासः उत्प्रेक्षा च॥१५॥

भव्यानि हानीरगुरेतदङ्गाद्यथा यथाऽनर्ति तथा तथा तैः।
अस्याऽधिकस्योपमयोपमाता दत्ता प्रतिष्ठा खलु तेभ्य एव ॥१६॥

---

भव्यानीत्यादि[1]। भव्यानि चन्द्रादीनि एतदङ्गात्[2] एतस्या दमयन्त्या[3] अङ्गात् मुखादेर्यथा [यथा] हानीर्निकृष्टताम् अगुः प्रापुः, तथा [तथा] तैः भव्यैः अनर्ति। खलु यस्मात् अस्य[4] अङ्गस्याऽधिकस्य उपमया[5] उपमां कृत्वा[6] उपमाता पुरुषः तेभ्यश्चन्द्रादिभ्य एव प्रतिष्ठा दत्ता। अन्यस्य जगति उपमानस्याऽभावात्। उत्कर्षं निकर्षेण यदा उपमीयते तदा [हीनस्य] महती प्रतिष्ठा[7] ॥१६॥

---

नाऽस्पर्शि दृष्टाऽपि विमोहिकेयं दोषैरशेषैः स्वभियेति मन्ये।
अन्येषु तैराकुलितस्तदस्यां वसत्यसम्बाधसुखी गुणौघः ॥१७॥

---

नाऽस्पर्शीत्यादि[1]। अहमिति मन्ये - इयं दमयन्ती अशेषैरपि [दोषैः] दौर्भाग्यादिभिः स्वस्याऽऽत्मनो भिया भयेन[2] नाऽस्पर्शि। न स्पृष्टा। यत् इयं दृष्टाऽपि सती विमोहिका[3] विशेषमोहकारिणी। अतः भयम्। तत्तस्मात् अस्यां विषये गुणानां लावण्यादीनामोघः समूहः असम्बाधेन दोषाणामसङ्करत्वेन[4] सुखी सन् वसति। किं भूतः? अन्येषु पुरुषेषु[5] तैर्दोषैर्मात्सर्यादिभिराकुलितः। तत्र गुणा अल्पा, दोषा बहवः[6] ॥१७॥

---

1 P. भव्या; P2 भव्यानि हानीति। 2 P, P2 om. एतदङ्गात् 3 P, P2 om. दम-यन्त्या 4 U तस्य 5 P. उपमाय 6 P, P2 om. उपमां कृत्वा 7 P. add. हानिगमन-वर्तनविरोधैः क्रियोः। काव्यलिङ्गानुप्रासोऽपि ॥१६॥
1 P. नास्पर्शि; P2 नास्पर्शीति। 2 P, P2 om. भयेन 3 P, P2 om. विमोहिका 4 P. add. असापत्न्येनेति पाठे सपत्न्यराहित्येन 5 P. om. पुरुषेषु; P2 पुरुषेषु। स्वे 6 P. add. काव्यलिङ्गमुत्प्रेक्षा विरोधोऽपि ॥१७॥

औज्झि प्रियाङ्गैर्घृणयेव रूक्षा न वारिदुर्गात्तु वराटकस्य ।
न कण्टकैरावरणाच्च कान्तिर्धूलीभृता काञ्चनकेतकस्य ॥१८॥ /र्धृ

औज्झि[2] प्रियाङ्गैरिति । प्रियायाः अङ्गैः वराटकस्य पद्मबीजकोशस्य कान्तिर्गौरता औज्झि त्यक्ता[3] । [[4]बीजकोशो सरोजस्य कर्पदोऽपि वराटकः ( ? ) ] उत्प्रेक्षते—घृणया इव जुगुप्सया इव । यतो रूक्षा अस्निग्धा, न तु वारिदुर्गात् त्यक्ता । जलं दुर्गं प्रतिष्ठां भावित्वा न तु त्यक्ता । रौक्ष्यादिति[5] पुस्तकान्तरपाठे[6] रूक्षस्य भावो रौक्ष्यं तस्मात् । तथा प्रियाङ्गैः काञ्चनकेतकस्य कान्तिः न कण्टकैरावरणात् त्यक्ता । किन्तु धूलिभिर्धृता[7] व्याप्ता । क्वचिच्च धूलिभृता इति पाठे केतकस्य[8] विशेषणम् । कान्तिस्ताभ्यां सकाशात् रम्या[9] ॥१८॥

प्रत्यङ्गमस्यामभिकेन रत्नं कर्तुं मघोनेव निजास्त्रमस्ति ।
वज्रं च भूषामणिभूतिधारि नियोजितं तद्द्युति कार्मुकं च ॥१९॥

प्रत्यङ्गमित्यादि[1] । अस्यां दमयन्त्यां[2] विषये प्रत्यङ्गं मघोना इन्द्रेण अभिकेन सकामेन सता निजास्त्रं वज्रं कार्मुकं च नियोजितम् अस्ति । /स्त्रं किं भूतं वज्रम् ? भूषार्थं[3] ये मणयस्तेषां[4] भूतिं धरतीत्येवंशीलम्[5] । कार्मुकं किं भूतम् ? तेषां हीरकाणां[6] द्युतिर्यत्र तत्तथा[7] । अथवा, ततो द्युतिरेव ।

1 P2 ... भृता: 2 P औज्झि । P2 औज्झीति । 3 P2 त्यक्ता: । 4 P ~~...~~ बीज० ... वराटक: om सकाशात् रम्या in P. तु वराटकस्येति पाठे तु इति वितर्के । 5 P2 रौक्ष्या० 6 P पुस्तकान्तरे 7 P, P2 धृता 8 P, P2 केतकविशे० 9 P add.
अनुप्रास: तुल्ययोगिता उत्प्रेक्षा हेतुश्च ॥१८॥
1 P प्रत्यङ्ग ।; P2 प्रत्यङ्गमस्यामिति । 2 P, P2 om दमयन्त्यां 3 B भूषणार्थं 4 B मणय० 5 B धारयन्ती० 6 P मणीनां 7 B तत ——

कार्मुकम् ऐन्द्रं धनुः ॥१९॥

अस्याः सपक्षैकविधोः कचौघः स्थाने मुखस्योपरि वासमाप।
पक्षस्थलावद्भुचन्द्रकोऽपि कलापिनां येन जितः कलापः ॥२०॥

1 अस्या इत्यादि। इदानीं (107 b) केशपाशादारभ्य[2] नखान्तं वर्णयति। अस्याः कचौघः केशपाशः मुखस्योपरि यद्वासम् आप तत्स्थाने युक्तम्। किंभूतस्य मुखस्य? सपक्ष एको विधुश्चन्द्रो यस्य तस्य तथा। चन्द्रनिभस्य। येन केशपाशेन कलापिनां मयूराणां कलापो जितः। किंभूतः? पक्षेषु पिच्छेषु स्थिताः [तावन्तो][3] बहवश्चन्द्रका[5] यत्र[4] स तथा। अथ च मुखस्य एको विधोः सपक्षः सहायः केशपाशस्य[6] बहवः पक्षे पक्षपाते स्थिताश्चन्द्राः। बहुव्रीहौ कः। अतः तस्य उपरि वासं निवासम्[7]। अथवा[8], आवासं प्रयाणं ददौ[9] ॥२०॥

अस्या यदास्येन पुरस्तिरस्य तिरस्कृतं शीतरुचान्धकारम्।
स्फुटस्फुरद्भङ्गकचच्छलेन तदेव पश्चादिदमस्ति बद्धम् ॥२१॥

8 P, P2 इन्द्रधनुः 9 P, vdd. इति समस्तं पदम्। मणिद्युतिर्हि इन्द्रधनुः-सदृशी भवति। इन्द्रधनुश्च वज्रादुदेति। तथा च कालिदासः — प्रशमादर्चिषामेतदनुद्गीर्णसुरायुधम्। वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते (कु II. 20) इति ॥ सापह्नवोत्प्रेक्षा हेतुस्तुल्ययोगिता च समुच्चयश्च ॥१९॥ // 1 P. अस्या।; P2 अस्या इति। 2 P. नखान्तं केशादारभ्य 3 B, P. om. तावन्तो 4 P2 यस्य 5 P2 अप्यस्य 6 P. कलापस्य 7 B स्थानम् 8 P2 अथ च 9 P, vdd. युक्तम्। साम्प्रतमिति स्थाने। अव्ययम्। सपक्षैक-विधोरिति भाषितपुंस्कत्वात् पुंवद्भावः। प्रतीपं हेतुः। सपक्षः चन्द्रपक्षः श्लाघ्याः श्लिष्टाः। अनुप्रासो विरोधश्च ॥२०॥

सर्ग ७ 14

अस्या[1] इत्यादि। अस्या आस्येन शीतरुचा चन्द्रेण पुरः अग्रे निरस्ते[2] वामदक्षिणपक्षे च यदन्धकारं निरस्कृतं तदेव इदमन्धकारं पश्चाद्भागे [बद्धं] सम्बद्धम् अस्ति। केन?। स्फुरद्‌ स्फुरत् भङ्गाः[3] कुटिलता येषां ते तथा। ते च कचास्तेषां[4] छलेन[5] धम्मिल्लव्याजेन॥२१॥

अस्याः कचानां शिखिनश्च किं नु विधिं कलापौ विमतेरगाताम्।
तेनाऽयमेभिः किमपूजि पुष्पैरभर्त्सि दत्त्वा स किमर्धचन्द्रम्॥२२॥

अस्या[1] इत्यादि। अस्याः कचानां [कलापः] शिखिनो मयूरस्य च कलापः उभा[वपि] केश[2]कलापभारौ विमतेः[3] विरोधात्[4] कलहात् [5]नु वितर्के किं[6] विधिं ब्रह्माणम्[7] अगातां[8] जग्मतुः[9] तेन ब्रह्मणा अयं[10] केशकलापः[11] एभिः पुष्पैः किमपूजि[12] स [पुनः] मयूरकलापः किमर्द्धचन्द्रं[13] [गले हस्तं] दत्त्वा अभर्त्सि निष्कासितः[14]॥[अथ च मयूरपिच्छेषु[15] अर्द्धचन्द्रका भवन्ति][16]॥२२॥

केशान्धकारादथ दृश्यभाल स्थलार्धचन्द्रा स्फुरदष्टमीयम्।
एतां यदासाद्य जगज्जयाय मनोभुवा सिद्धिरसाधि साधु॥२३॥

1 P1 अस्या।; P2 अस्या इति। 2 P1 निरस्त्रे 3 B भङ्गाः 4 D केश।[illegible] 5 P1 add. अथ च यन्निरस्क्रियते स बध्यते। अनुप्रासो रूपकमपह्नुतिर्बद्धमिति निष्कृष्टम्॥२१॥

1 P1 अस्याः।; P2 अस्या इति। 2 B कलापौ 3 P1 P2 om. केशकलापौ 4 P1 P2 परस्परविरोधात्; cont. P2 add. सकाशात् 5 P1 om. नु वितर्के 6 P2 नु here 7 P1 सृष्टिकर्तारम् 8 P2 om. जग्मतुः 9 P1 add. अथ पश्चात् 10 B हेतुना; P2 विधिना 11 P1 om. अयं; P2 add. रम्यत्वात् 12 P1 P2 उपाश्रः किम् 13 P2 om. किम् 14 P1 P2 om. निष्कासितः 15 P1 मयूरपक्षी पिच्छे 16 P1 add. उत्प्रेक्षा प्रतीपम् अर्द्धचन्द्रमिति निष्कृष्टम्॥२२॥

सर्ग ८ 15

केशेत्यादि। स्फुटमियं दमयन्ती साक्षाद्[1]दष्टमी[2] तिथिः। किं भूता। केश एव अन्धकारं तस्मात् अथ अनन्तरं दृश्यं भालस्थलमेव अर्द्धचन्द्रो[3] यस्याः। अर्थे[4]च कृष्णाष्टम्याम् अर्द्धरात्रेरन्धकाराद्नन्तरम् अर्द्धचन्द्रो दृश्यते। यत् यस्मात्[5] एनां दमयन्तीलक्षणाम् अष्टमीमासाद्य मनोभुवा कामेन जगतो जयाय साधु सम्यक् सिद्धिरसाधि। अष्टम्यां हि साधकाः सिद्धिमवाप्नुवन्ति[7]॥२३॥

पुष्पं धनुः किं मदनस्य दाहे श्यामीभवत्केसरशोभमासीत्।
व्यधाद्द्विधेशस्तदपि क्रुधा किं भैमीभ्रुवौ येन विधिर्व्यधत्त॥२४॥

पुष्पमित्यादि।[1] किं वितर्के[2]। पुष्पं धनुर्मदनस्य कामस्य[3] दाहे श्यामीभवत् कृष्णो[4] सत् केसरशोभमासीत्[5]। मध्यगता केसरा रूपाद्यवशिष्टा[6] यत्र[7] तेऽचाद्ग्धत्वात् कालवर्णाः। तदपि केसरशोभं[8] धनुः ईशो महेश्वरः किं क्रुधा कोपेन[9] द्विधा व्यधात् बभञ्ज। येन धनुषा[10] खण्डद्वयेन विधिर्ब्रह्मा[11] भैम्या भ्रुवौ व्यधत्त[12]॥२४॥

1 P₁ लेशा; P₂ केशान्धकारादिति। 2 P₁P₂ om. स्फुटात् 3 P₁ add. भालस्थले अर्द्धचन्द्रस्तिलकाकारो वा यस्याम् 4 B तथा 5 P₁ add. कारणात् 6 P₁ add. उपरकादि 7 P₁ add. अनुप्रासो रूपकमुत्प्रेक्षा श्लेषोऽपि॥२३॥

1 P₁ पुष्पं धनुरि; P₂ पुष्पमिति। 2 P₁P₂ om. वितर्के 3 P₁P₂ om. कामस्य 4 P₁P₂ om. कृष्णो 5 P₁ add. श्यामीभवदिति समस्तं केसरविशेषणं वा 6 P₁ उप विशिष्टा 7 P₁P₂ om. यत्र 8 P₁P₂ om. केसरशोभं 9 P₁P₂ om. कोपेन 10 B धनुः 11 P₁P₂ om. ब्रह्मा 12 P₁ add. अनुप्रास उत्प्रेक्षाऽतिशयोक्तिः॥२४॥

सर्ग ७ 16

भ्रूभ्यां प्रियाया भवता मनोभूचापेन चापे घनसारभावः।
निजां यदप्लोषदशामपेक्ष्य सम्प्रत्यनेनाऽधिकवीर्यताऽर्जि ॥२५॥

[1] भ्रूभ्यामित्यादि। मनोभूचापेन[2] कामधनुषा[3] प्रियाया भ्रूभ्यां भवता सता घनसारभावश्च आपे प्राप्तः दृढभावोऽधिगतः। यत् अनेन भ्रूद्वयलक्षणेन धनुषा निजामप्लोषदशां पूर्वाम् अदाहावस्थाम् अवेक्ष्य[5] अपेक्ष्य[6] सम्प्रति दाहेऽपि अधिकवीर्यता अर्जि अर्जिता। दमयन्तीभ्रूदर्शने कामपरवश्यता भवति। अथ च कर्पूरो घनसारः स्यात्। कर्पूरश्च दग्धः सन् शक्तिमान्[7] भवति। अदग्धावस्थायाः सकाशात्[8] ॥२५॥

स्मारं धनुर्यद्विधुनोज्झितं स्यात् यदाऽऽस्येन भूतेन च लक्ष्मलेखा।
एतद्भ्रुवौ जन्म तदाप युग्मं लीलाचलत्वोचितबाल्यभावम् ॥२६॥

[1] स्मारमित्यादि। स्मरस्य[2] कामस्येदं स्मारम्। यत् स्मारं कामस्य[3] धनुः तथा[4] अस्या दमयन्त्या[5] आस्येन[6] भूतेन (सता) विधुना चन्द्रेण च या लक्ष्मलेखा लाञ्छनलेखा[7] उज्झिता त्यक्ता[8]। मुखचन्द्रो हि निष्कलङ्कः। यत्[9] युग्मं धनुःकलङ्कयुगलम्[10] एतस्या भ्रुवौ जन्म आप भ्रूरूपं जातम्। किंभूतम्? लीलाचलत्वस्य उचितो बाल्यभावो।

1 P. भ्रूभ्यां प्रियायाः; P2 भ्रूभ्यामिति। 2 P. P2 मनोभुवः 3 P. P2 om. कामधनुषा 4 P2 °सारस्य 5 P. अपेक्ष्य अवेक्ष्य 6 B ... उपेक्ष्य 7 P. शक्तिमान् भवति. after सकाशात् 8 P. add. अनुप्रासोऽतिशयोक्तिश्चानुमानं श्लेषश्च ॥२५॥
1 P. स्मारं धनुः; P2 स्मारं धनुरिति। 2 P. P2 om. स्मरस्य... स्मारं 3 P. स्मा om. कामस्य 4 P. P2 om. तथा; and या च विधुना here 5 P. P2 om. दमयन्त्या 6 P. आस्यभूतेन 7 P. P2 om. लाञ्छनलेखा 8 P. P2 om. त्यक्ता 9 P. P2 तत् 10 P. °कलङ्क० ॥

॥ सर्ग ८ 17

यत्र॥[केशत्वे यस्य भ्रुवोः केशाः इत्येवा चलन्ति। अथ च लौल्यो - स्वभावेन चलो बाल्यभावो यस्य। बालः किल चपलो भवति। पुन- र्जातित्वाद् बाल्यभावः]॥[13] ॥२६॥

---

इषुत्रयेणैव जगत्त्रयस्य विनिर्जयात् पुष्पमयाशुगेन।
शेषा त्रिबाणी सफलीकृतेयं प्रियादृगम्भोजपदे निषिच्य ॥२७॥

---

इषुत्रयेणेत्यादि[1]। पुष्पमयाशुगेन कामेन शेषा द्वयोर्बाणयोः समाहारः द्विबाणी प्रियाया दृशौ एवाम्भोजं तस्य पदे स्थाने अभि- षिच्य सफलीकृता। कस्मात्?। इषुत्रयेणैव बाणत्रयेणैव जगत्त्रयस्य त्रिभुवनस्य[3] विनिर्जयात्[4] ॥२७॥

---

सेयं मृदुः कौसुमचापयष्टिः स्मरस्य मुष्टिग्रहणार्हमध्या।
तनोति नः श्रीमदपाङ्गमुक्तां मोहाय या दृष्टिशरौघवृष्टिम् ॥२८॥

---

सेयमित्यादि[1]। सा इयं मृदुर्दमयन्ती[2] स्मरस्य कामस्य[3] कौसुमचापयष्टिः[4] पुष्पमयधनुर्लता[5]। किंभूता? मुष्टेर्ग्रहणस्य अर्हं योग्यं मध्यम् उदरं यस्याः। धनुः किल मुष्टिना[6] मध्ये ध्रियते। यतोऽस्माकं मोहाय श्रीमता अपाङ्गेन मुक्तां दृष्टयो[7] नेत्राणि एव शरौघाः[8] तेषां

---

॥ B1 B2 om. यत्र। 2 B2 लौल्यया। 3 अनुप्रासोऽतिशयोक्तिश्चानुमानं श्लेषश्च॥२६॥
1 B1 इषुत्रये; B2 इषुत्रयेणेति। 2 B1 B2 om. बाणत्रयेणैव 3 B1 B2 om. त्रिभु- वनस्य 4 B1 add. अत्र हीनेनापि पुष्पमयेषुत्रयेण जगत्त्रयजयलक्षण- गुरुकार्यकारणात् विपुलेन सागरशयस्येत्यादिवत् (का॰ प्र॰ X. 155 [illegible]) विषमो रूपकमति- शयोक्तिश्च॥२७॥ 1 B1 सेयं मृदुः; B2 सेयं मृदुरिति। 2 B1 B2 दमयन्ती मृदुः 3 B1 B2 om. कामस्य 4 B1 कौसुमचापस्य; B2 कौसुमस्य चापस्य 5 B1 B2 om. पुष्प- मयधनुर्लता। 6 B1 B2 मध्ये मुष्टिना 7 B1 B2 नेत्राणि दृष्टयः ~~[illegible]~~ अथवा

contd.

वृष्टिं तनोति[1] ॥२८॥

आघूर्णितं पक्ष्मलमक्षिपक्ष्मं प्रांशुद्युतिः श्वैत्यजितामृतांशु ।
अस्या इवास्याश्चलदिन्द्रनीलगोलामलश्यामललारतारम् ॥२९॥

आघूर्णितमित्यादि[1] । अस्या अक्षिपक्ष्मं नेत्रकमलम्[2]
अस्या दमयन्त्या इव[3] अन्यदुपमानं नास्ति जगति । अतस्तेनैवोप-
मीयते । अनन्वयोपमा[4] । किंभूतम् ? आ ईषद् घूर्णितं तथा पक्ष्म-
युक्तं नयनगतरोमयुक्तं[5] तथा प्रांशुः उच्चैः द्युतिर्यस्य तत्तथा । तथा
श्वैत्येन श्वेततया जितोऽमृतांशुश्चन्द्रो येन । पुनः किंभूतम् ? चलन्ती
इन्द्रनीलगोलकवत्[6] इन्द्रनीलमणिगुटिकावत् अमला श्यामला
तारा उज्ज्वला तारा कनीनिका यस्य तत्तथा[7] ॥२९॥

कर्णोत्पलेनाऽपि मुखं सनाथं लभेत नेत्रद्युतिनिर्जितेन ।
यद्येतदीयेन ततः कृतार्थां स्वचक्षुषी कुरुते कुरङ्गी ॥३०॥ ॥कि

कर्णोत्पलेनेत्यादि[1] । कुरङ्गी हरिणी यदि एतस्याः सत् [तेन][2] । केन ? कर्णोत्पलेनाऽपि । सनाथं संयुक्तं स्वं मुखं लभेत ततः

cont. दर्शनान्येव । 4 P1 add. अत्र दृष्टिशब्दो नेत्रव्यापारेषु वर्तते । दर्शनपर्यायो
वा । या किल शरीरवृत्तिः सा अपाङ्गेन मुच्यते । अनुप्रासो रूपकमनुमान-
मपि । मध्यरेखा: शिलज: ॥२८॥

1 P1 आघूर्णितं ; P2 आघूर्णितमित्यादि । 2 P1 P2 om. नेत्रकमलं 3 P1 P2 om.
इव 4 P1 add. कुद्रमते 5 P1 P2 om. नयनगतरोमयुक्तं 6 BP1 गोलकं°
7 P1 P2 om. इन्द्र... वत् 7 P1 add. अनुप्रासः परिकरो रूपकमुपमा व्यतिरेकोऽ-
नन्वयश्च ॥२९॥ 1 P1 कर्णो ; P2 कर्णोत्पलेनेति । 2 P1 P2 om. तेन ; edn
add. तेन

सर्ग ७ 19

कृतार्थो सती स्व आत्मीये चक्षुषी किं[3] कुरुते किमपि[4] न करोति। अथवा[5] किङ्करमात्रे दासमात्रे[6] कुरुते। किं भूतेन?। अस्या नेत्रद्युतिना[7] निर्जितेन[8]॥३०॥

---

त्वचः समुत्सार्य दलानि रीत्या मोचत्वचः पञ्चजपारनायाम्।
सारैर्गृहीतैर्विधिरुत्पलौघादस्यामभूदीक्षणरूपशिल्पी॥३१॥

---

त्वच[1] इत्यादि। विधिर्ब्रह्मा मोचत्वचः कदलीत्वचः सकाशात्[2] तथा उत्पलौघाच्च सारैर्गृहीतैः अस्यां विषये ईक्षण-रूपस्य नेत्ररूपस्य शिल्पी कर्ता अभूत्। किं कृत्वा?। रीत्या क्रमेण। रम्भायाः त्वचः समुत्सार्य कमलदलानि चोत्सार्य। कस्यां सत्याम्?। पञ्चजपारनायां[3] पञ्च बर् त्वचो दलानि च परित्यज्य। कदल्या धवलत्वम्। उत्पलदलेभ्यः[4] कालिमानं च गृहीत्वेत्यर्थः[6]॥३१॥

---

चकोरनेत्रैणदृगुत्पलानां निमेषयत्नेण किमेष काष्टः।
सारः सुधोद्धारमयः प्रयत्नैर्विधातुमेतन्नयने विधातुः॥३२॥

---

चकोरेत्यादि[1]। विधातुर्ब्रह्मणः प्रयत्नैरुपक्रमैः कर्तृभिः किं चकोरनेत्राणां [चन्द्रोत्सङ्गमैणदृशोऽस्य अथवा सामान्येन]

---

3 P₁ add. अपि तु 4 P₂ om. किमपि 5 P₁ add. नेत्रयोः किङ्करत्वे 6 P₂ om. दासमात्रे 7 P₁P₂ ०द्युत्या 8 P₁ add. अनुप्रासो व्यतिरेकोऽतिशयोक्ति-श्च। काव्यलिङ्गं वा॥३०॥

1 P₁ त्वच।; P₂ त्वचः समुत्सार्येति। 2 P₁ om. तथा 3 P₁ add. सत्यां 4 P₂ ०कालि० 5 P₁P₂ om. च 6 P₁ add. यथासङ्ख्यमतिशयोक्तिश्च॥३१॥

1 P₁ चकोर।; P₂ चकोरनेत्रेति। 2 P₁ om. प्रयत्नैः; P₁P₂ om. उपक्रमैः ~~कर्तृभिः~~ कर्तृभिः

एणानां [3]हरिणानां दृशां [च] उत्पलानां च सुधोद्गारमयः सारः धवलिमादिः[4] तत्र किं निमेषयन्त्रेण कृष्टः आकृष्टः[5]। किं कर्तुम्? तस्या नयने विधातुम्। चकोरा अमृतं पिबन्ति[6]। [7]अथ (108 b) चकोराणां नेत्रम् एणानां दृक् एकदृक्, पश्चात् समाहारः। उत्पलेन सह चकोरनेत्राणाममृतम्। [नेत्राणां] मेषोन्मेषश्च, एणस्य चन्द्रोत्सङ्गस्थितत्वात्। तद् दृशाममृतपानं निमेषश्च। उत्पलानि सोमवंश्यानि रात्रौ अमृतं पिबन्ति, विकासं सङ्कोचं [8]चानुभवन्ति। [निष्ठ्यूतो]-द्गीर्णवान्तादिगौणवृत्तिव्यपाश्रयम्। [अति]सुन्दरमन्यत्र ग्राम्यकक्ष्यां विगाहते (काव्य० 2. 95) इति वचनात् उद्गारशब्दस्य [9]चारुत्वम्। [10]यतो चकोरनेत्रे अमृतत्वं चन्द्रोत्सङ्गत्वात्। मृगनेत्रेऽमृतत्वम्। सोमवंश्यत्वादुत्पलेऽप्यमृतत्वम्। तत एतेभ्यो निकृष्य दमयन्तीनयने सृष्टे विधिनेत्यर्थः। [यद्वा] सामान्येन हरिणा उच्यन्ते, तदा सुधोद्गार- शब्देन शोभातिशयो लक्ष्यते[11]॥३२॥

---

ऋणीकृता किं हरिणीभिरासीदस्याः सकाशान्नयनद्वयश्रीः।
भूयोगुणेयं सकला बलाद्यत्ताभ्योऽनयाऽलभ्यत बिभ्यतीभ्यः॥३३॥

---

3 P1 om. हरिणानां 4 M P1, P2 add. उत्कर्षः 5 P2 add. भारशब्दः पुंलिङ्गः
6 P1 P2 चरन्ति 7 P1 P2 om. अथ... नेत्राणाममृतम्। 8 P1 वाऽ° 9 B वाचकत्वम् 10 P1 P2 om. यतो.... विधिनेत्यर्थः। 11 P1 add. इक्षुप्रभृतीनां सारः किल यन्त्रेणाऽऽकृष्यते। अनुप्रासो रूपकमुत्प्रेक्षाऽतिशयोक्तिश्च॥; P2 add. अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके। वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा॥ कान्तारगास्तु दशकं सामुद्रा विंशकं शतम्। दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु॥ (याज्ञ० III. 37-38)॥ सन्ततिस्तु [पशु]स्त्रीणां रसस्याऽष्टगुणा परा। वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा ~~परा~~ परा (याज्ञ० III. 39)॥

ऋणीकृतेत्यादि[1]। अस्याः सकाशात् किं हरिणीभिर्नयनद्वय-
श्रीः[2] ऋणीकृता आसीत्[3] [4]व्याजेन गृहीता[5]। यत्[6] अनया [दमयन्त्या] ताभ्यो
हरिणीभ्य[7] इयं नेत्रलक्ष्मीर्बिभ्यतीभ्यः सकाशात् भूयोगुणा द्वि[त्रि]-
चतुः[8]पञ्चषड्[9]गुणादिका अतोऽप्यधिका अलभ्यत[10] सकला[11]। तदुक्तम् -
अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके। वर्णक्रमाच्छतं द्वित्रि-
चतुःपञ्चकमन्यथा॥ कान्तारगास्तु दशकं सामुद्रा[12] विंशकं शतम्। दद्यु[13]र्वा स्वकृतां वृद्धिं सर्वे[14] सर्वासु जातिषु॥ सन्तति[15]स्तु पशुस्त्रीणां
रसस्याऽष्टगुणा परा। वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा॥
(याज्ञ° III. 37-39)॥ तथा कालिका कारिता[16] चक्रवृद्धिरित्यादि-
प्रकारैर्भूयोगुणा। [17]तथा बलात्कारेणाऽर्जिता इत्यर्थः। येन किल[18] आध-
मर्ण्येनोत्तमर्ण्यं हृतं कृतं तस्मात् सव्याजं सकलं[19] बलादादत्ते[20]॥ ३३॥

---

दृशौ किमस्याश्चपलस्वभावे न दूरमाक्रम्य मिथो मिलेताम्।
न चेत्कृतः स्यादनयोः प्रयाणे विघ्नः श्रवःकूपनिपातभीत्या॥ ३४॥

---

दृशावित्यादि[1]। अस्याश्चपलस्वभावे[2] दृशौ किं मिथः[3]
परस्परं दूरम्[4]अतिशयेनाऽऽक्रम्याऽऽगत्य न मिलेताम्। अपि तु मिलि-

---

1 P1 ऋणी; P2 ऋणीकृतेति। 2 B ऋण° 3 P2 om. आसीत्...गृहीता 4 P1 add. कृद्ध्या 5 P1 add. अर्थिते स्म। ऋणम् उत्तमर्णादुद्धारत्वेन ग्रहणम्। ऋणमाधमर्ण्ये (पा° VIII.ii.60)। 6 P2 येन 7 P1P2 मृगीभ्यः 8 P1 om. °चतुः° 9 P2 om. °षड्° 10 P1 सकला बलात्कारेण अलभ्यत अर्जिता इत्यर्थः। 11 P2 तदुक्तम्... °द्विगुणा परा in VII.32. 12 B °दशतं 13 B दद्याद्वा 14 B उक्तो धामव° 15 P1 सन्ततेस्तु 16 B कालिता 17 P1 om. तथा... इत्यर्थः 18 P1P2 om. किल 19 P2 om. बलात् 20 P1 add. अनुप्रासः सोत्प्रेक्षमनुमानं समासोक्तिः॥ ३३॥ // 1 P1 दृशौ; P2 दृशौ किमस्या इति। 2 P1 add. हेतुगर्भं विशेषणम् 3 P1P2 om. परस्परं 4 P1P2 om. अतिशयेन

ध्यतामेव। चेत् अनयोर्दृशोः प्रयाणे सति श्रवसी कर्णावेव कूपौ तत्र निपातभीत्या। विघ्नो नु कुतः स्यात्। तत्र गत्वा विश्रान्ते[5] ॥३४॥

केदारभाजा शिशिरप्रवेशात् पुण्याय मन्ये मृतमुत्पलिन्या।
जाता यतस्तत्कुसुमेक्षणेयं यतश्च तत्कोरक इक्चकोरः ॥३५॥

केदारभाजेत्यादि[1]। अहमेवं मन्ये। उत्पलिन्या[2] पुण्याय मृतं मरणं प्राप्तं केदारं क्षेत्रं भजते या तया तथा। कस्मात्? शिशिरप्रवेशात्। तत्र किल हिमेन सा दह्यते। अतः पुण्याद्[3] इयं दमयन्ती तस्याः उत्पलिन्याः कुसुमान्येव ईक्षणानि यस्याः तथाविधा जाता। यतश्च[4] पुण्यात्[5] चकोरोऽपि तस्या उत्पलिन्याः कोरकाकारौ[6] दृशौ यस्य[7] स तथाविधो जातः। यः किल श्रीकेदारं नमस्कृत्य शिशिरे हिमं प्रविश्य म्रियते, स तेन जन्मान्तरमुत्कृष्टं (१०१०) लभते[8] ॥३५॥

नासाऽदसीया तिलपुष्पतूणं जगत्त्रयव्यस्तशरत्रयस्य।
श्वासानिलामोदभरानुमेयां दधद्द्विबाणीं कुसुमायुधस्य ॥३६॥

नासेत्यादि[1]। अमुष्यां इयं अदसीया नासा नासिका तिलपुष्पतूणं भस्त्रा। किं [कुर्वत्]? कुसुमायुधस्य द्विबाणीं दधत्।

5 B विश्रान्तः; P2 विश्रान्ते: 6 P1 add. तेनाऽतिदीर्घत्वं चञ्चलत्वं च प्रतिपादितम्। चपलः किल दीर्घमुत्प्लवमानोऽपि कूपपतनभयान्निवर्तते। उत्प्रेक्षा काव्यलिङ्गं रूपकं समासोक्तिश्च ॥३४॥

1 P1 केदारभाजा ॥; P2 केदारभाजेति। 2 P2 उत्पलिन्याः 3 P1 पुण्यात् कारणात् 4 P1 यतश्च 5 B पुण्या; P1 add. कारणात् 6 P1 कोरकाकारे दृशौ 7 B यस्याः 8 P1 add. उत्प्रेक्षा समासोक्तिश्च ॥३५॥ 1 P1 नासा॥; P2 नासादसीयेति।

किं भूताम्? श्वासानिलस्याऽऽमोदभरेण अनुमिताम्। नासिकासञ्चारिणः प्राणस्य पुष्पपरिमललुब्धत्वात्। किं विशिष्टस्याः? जगत्त्रये व्यस्तं विविधं [2]क्षिप्तं शरत्रयं येन तस्य तथा। पञ्चबाणत्वात् शेष[3]द्वयं तूणेऽस्ति[4] ॥३६॥

---

बन्धूकबन्धूभवदेतदस्या मुखेन्दुनानेन सहो[ज्जि]हानाम्।
रागश्रिया शैशवयौवनीयां स्वमाह सन्ध्यामधरोष्ठलेखा ॥३७॥

---

[1]बन्धूकेति। अस्या [अधरोष्ठलेखा] एतत् स्वम् आत्मानं शैशवस्य यौवनस्य सम्बन्धिनीं [2]सन्ध्याम् आह। वयःसन्धौ भवत्वात् सन्ध्या[3] अथवा आदौ उकारस्य वृद्धत्वात् वृद्धाच्छः (पा० IV.ii.114) इति छप्रत्ययः। कया? रागश्रिया। किं भूतम्? [स्वं स्वरूपम्] अधरं [6]बन्धूकबन्धूभवत्। रागेण सदृशीभवत्। किं भूताम्? अनेन मुखेन्दुना सह उज्जिहानाम्। मुखे[7] ओष्ठस्य विद्यमानत्वात्। सन्ध्या [अपि] रक्ता, इन्दुना च समुज्जिहाना[8] ॥३७॥

---

अस्या मुखेन्दावधरः सुधाभूर्बिम्बस्य युक्तः प्रतिबिम्बभावः।
तस्याऽथ वा श्रीद्रुमभाजि देशे सम्भाव्यमानोऽस्य तु विद्रुमे सा ॥३८॥

---

2 B क्लृप्तं 3 P₁ P₂ शेषे द्वयं 4 P₁ add. कुसुमायुधस्येति साभिप्रायम्। एतेन दमयन्त्याः पद्मिनीत्वमुक्तम्। तथा रतिरहस्ये - तिलकुसुमसमानां बिभ्रती नासिकां च (रतिर० 8.12) इत्यादि। रूपकमनुमानम् ॥३६॥
1 P₁ बन्धूका; P₂ बन्धूकेति। 2 P₁ om. सन्ध्याम् 3 P₂ वयः...भवत्वात् abt रागश्रिया 4 P₁ add. तथा ओष्ठमध्ये निम्नसन्धौ भवत्वात् 5 P₁ om. स्वं 6 P₂ बन्धूकपुष्पस्य 7 P₁ add. च 8 P₂ add. च 9 P₁ add. उपमानं सहोक्तिः। सन्ध्या इति श्लिष्टम्। रूपकातिशयोक्तिरनुप्रासश्च ॥३७॥

[अस्या इति[1]] अस्या [मुखेन्दौ मुखचन्द्रे[2]] अधर ओष्ठः सुधायाः अमृतस्य भूः स्थानं तत इव बिम्बस्य पदार्थस्य प्रतिबिम्बो युक्तः। यथोदकस्थाने त्वत्र बिम्बं प्रतिबिम्ब्यते। अथ च बिम्बीफलस्य रक्तत्वात् प्रतिबिम्बः सदृशः। अथ[3] वा तस्य फलस्य श्रीः शोभा द्रुम-भाजि देशे सम्भाव्यमाना। वनमध्ये बिम्बीलता जायते। अस्योष्ठस्य तु पुनर्लक्ष्मीर्विद्रुमे द्रुमरहिते देशेऽस्ति। अथ च विद्रुमे प्रवाले [सा श्रीः] ओष्ठस्य बिम्बादपि [विद्रुमे] सङ्गता भवति[4]॥ ३८॥

---

जानेऽतिरागादिदमेव बिम्बं बिम्बस्य तु व्यक्तमितोऽधरत्वम्।
द्वयोर्विशेषावगमाक्षमाणां नाम्नि भ्रमोऽभूदनयोर्जनानाम्॥ ३९॥

---

जानेऽतिरागादित्यादि[1]। अहमेव जाने। अतिरागात् अतिलोहितत्वात्[2] इदमेव बिम्बम् ओष्ठो न भवति, तु [पुनः] बिम्बस्य इत ओष्ठात् व्यक्तं स्फुटम्[3] अधरत्वं निकृष्टत्वम्। अध इयर्तीति अधरः इति अधरनिरुक्तम्। तथा[4] च यास्काचार्येणो[5]-क्तम् - अधरः अधो अरः[6] [7]न धावतीत्यूर्ध्वगतिः प्रतिषिद्धा (नि० ॥ ११)/ती इति।[8] यस्मात्[9] जनानां लोकानाम् अनयोर्द्वयोर्नाम्नि विषये भ्रमो भ्रान्तिरभूत्। किं भूतानाम्?[10] बिम्बस्याऽधरस्य चोभयोर्विशेषो

---

1 P1 अस्या। 2 B P1 P2 om. मुखेन्दौ मुखचन्द्रे, edr. add. मुखेन्दौ मुखचन्द्रे 3 P1 add. पूर्वोक्तमाक्षिपति 4 P1 add. अनुप्रासो रूपकमतिशयोक्तिर्व्यति-रेक आक्षेपश्च। विद्रुम इति श्लिष्टम्॥ ३८॥ /1 P1 जाने। P2 जाने इति। 2 P1 P2 om. अतिलोहितत्वात् 3 P1 P2 om. स्फुटं 4 B अथ 5 P1 P2 यास्का-चार्यः 6 P2 om. अरः 7 B add. अधरः निरुक्तत्वात् सल्लोपः। किन्तु ऊर्ध्वो 8 P1 add. अधो अर इत्यधरनिर्वचनप्रसक्तस्य अधःशब्दस्य न धाव-तीति] निर्वचनम्। ऊर्ध्वगतिप्रतिषिद्धेति निकृष्टत्वमित्यर्थः। 9 P1 P2 यत 10 P1 add. द्वयोः 11 P1 बिम्बाधरस्य

भेदस्तस्याऽकामे रागेऽक्षमाणाम् असमर्थानाम्[12]। बिम्बस्य[13] सम्मुख-
मधरं वदन्ति[14]। अधरस्य बिम्बतात्पर्येणाऽहम् ओष्ठस्य ~~बिम्बं~~,
बिम्बं, बिम्बस्याधरत्वं मन्ये ॥३९॥

मध्योपकण्ठावधरोष्ठभागौ भातः किमप्युच्छ्वसितौ यदस्याः।
तत्स्वप्नसम्भोगवितीर्णदन्तदंशेन किं वा न मयाऽपराद्धम् ॥४०॥

मध्योपकण्ठावित्यादि[1]। यदस्या अधरस्यौष्ठस्य भागौ किमपि उच्छ्वसितौ भातः शोभेते[2]। किं[3] विशिष्टौ? मध्यस्याऽन्तरालस्योपकण्ठौ समीपौ। ओष्ठो हि वामदक्षिणपक्षे मध्यभागात् किञ्चिदुन्नतो[4] भवति। [तत्] तत्राऽस्मिन्[5] ओष्ठे किं वा अथवा[6] किं [नु] मया नाऽपराद्धम्। अपि तु अपराद्धम्। किंभूतेन मया? स्वप्ने यः सम्भोगः तत्र वितीर्णो दन्तदंशो दन्तक्षतं येन [तेन] वा तथा। [मम] दन्तक्षतेन स्वप्नदत्तेन[7] ओष्ठस्य भागद्वयम् उन्नतमिव[8] ॥४०॥

विधा विदर्भेन्द्रसुताधरोष्ठे नृत्यन्ति कत्यन्तरभेदभाजः[1]।
इतीव रेखाभिरपभ्रमस्ताः सङ्ख्यातवान् कौतुकवान् विधाता ॥४१॥

12 P1 P2 om. असमर्थानाम् 13 P1 ओष्ठस्य 14 P1 add. निकृष्टं बिम्बमिति वदन्ति। रागो लौहित्यमनुरागश्च। बिम्बस्य चेति पाठान्तरम्। रूपक-व्यतिरेके भ्रान्तिमान् हेतुः। अतिरागादिति क्लिष्टम्; P2 add. ओष्ठं बिम्बमिति वदन्ति ॥३९॥

1 P1 मध्ये; P2 मध्योपेते 2 P1 P2 om. शोभेते 3 P1 om. किं विशिष्टौ? 4 P1 P2 om. किञ्चित् 5 P1 P2 om. अस्मिन् ओष्ठे 6 P1 P2 om. अथवा 7 P2 om. स्वप्नदत्तेन 8 P1 add. उत्प्रेक्षा ॥४०॥ 1 P2 text व्लाभ°

सर्ग ७ 27

यदि[2] प्रसादीत्यादि[3] । यदि एषा सुधांशोः स्मितस्य सहस्रम् अंशं[6] निजहास्यसहस्रभागमपि प्रसादीकुरुते, तत्[4] स देवः तं[5] स्मितस्यांशं निर्मथ्य[7] कौमुदीनां[8] [स्वां] जन्म सफलं कुरुते[9] । एतावता तस्य सफलत्वम्[10] ॥४३॥

---

चन्द्राधिकैतन्मुखचन्द्रिकाणां दशायते तत्किरणाद्घनानाम् ।
पुरःसरस्रस्तपृषद्द्वितीयं रदावलिद्वन्द्वति बिन्दुवृन्दम् ॥४४॥

---

चन्द्राधिकेत्यादि[1] । चन्द्रादप्यधिका[2] या एतस्या[3] मुखचन्द्रिका ज्योत्स्नाः तासामेव घनानां मेघानां बिन्दुवृन्दं रदानां दन्तानां आवलिद्वन्द्वमिवाचरति । किं भूतम् ? पुरःसरो बिन्दुपतनादनन्तरम् उपरि द्वितीयो येन एव दृश्यते [सर्वत्र] ।[4] अग्रेतनः स्रस्तः पतितो यः पृषद्बिन्दुः स एव द्वितीयो यस्योपरितनपतितुकामबिन्दुवृन्दस्य तत्तथा । एका अधोदन्तपङ्क्तिर्द्वितीया उपरा । किं भूतम् उपरितनं बिन्दुवृन्दम् ? तस्याऽग्रेतनस्रस्तबिन्दोः किरणात् क्षरणात्[5] दशम् ईषत् आयतं[6] दीर्घम् अपि च घनानां निबिडानाम्[8] ॥४४॥[7]

---

2 P यदि प्रसादी; P2 यदीति । 3 B प्रसीदेति । 4 B तत्तः 5 P2 तस्य 6 P1 स्मितांशं 7 P2 निर्मिथ्य 8 P1 om. कौमुदीनां 9 P2 add. निजाः कौमुदीः स्मितस्योपरि उत्तार्य त्यजति अथवा कौमुदीनां देवः तत्स्मितांशं निर्मन्थ्य स्वं जन्म सफलं कुरुते । 10 P1 add. अतिशयोक्तिः ॥४३॥ // 1 P1 चन्द्राधिकैः; P2 चन्द्राधिकेति । 2 P1 add. चन्द्राधिकस्यैतन्मुखच्छाया चन्द्रिकाः अथवा 3 P2 om. अपि 4 P1 add. अतः पुरःसराणि स्रस्तानि पृषन्ति बिन्दवो द्वितीयानि यस्य आरितन॰ 5 P2 om. क्षरणात् 6 B दीर्घम् आयतम् 7 P1 add. अत्र वक्ष्यमाणस्यापि पुरःसरस्रस्तपृषदित्यस्य व्याख्यावशात् पूर्वकच्छन्दस्य पूर्ववस्तुपरामर्शत्वम् । तथ्यचन्द्रिकाणामिति व्याख्या । 8 P1 add. स्निग्धत्वविषः शितशिखा नाऽतिदीर्घास्तथा वगास्पृशः समघना दशनाः प्रशस्ताः (?) । ) अनुप्रासो रूपकमतिशयोक्तिर्घनानामिति श्लेषश्च ॥४४॥

सर्ग ८ 28

सेयं मदेवाद्विरहार्तिमूर्च्छा तमीविभातस्य विभाति सन्ध्या।
महेन्द्रकाष्ठागतरागकर्त्री द्विजैरमीभिः समुपास्यमाना ॥४५॥

सेयमित्यादि[1]। सेयं[2] दमयन्ती मम एतस्या विरहार्तिस्तया मूर्च्छा मोहः सैव तमी रात्रिस्तस्या। विभातस्य सन्ध्यारूपा विभाति प्रतिभासते। एतद्दर्शनान्मूर्च्छाऽऽगता। किंभूता ?। महेन्द्रस्य काष्ठा-गतस्य परमप्रकर्षप्राप्तस्य [रागा[3] कर्त्री[4]। तथा अमीभिः द्विजैः] दन्तैः समुपास्यमाना। सन्ध्याऽपि इन्द्रकाष्ठा पूर्वा दिक् तस्यां रागं रक्तत्वं कुरुते। द्विजैर्ब्राह्मणैश्च उपास्यते प्रातः[4]॥४५॥

राजौ द्विजानामिह राजदन्ताः संबिभ्रति श्रोत्रियविभ्रमं यत्।
उद्वेगरागादिभृजावदाताश्चत्वार एते तदवैमि मुक्ताः ॥४६॥

राजौ द्विजानामित्यादि[1]। इह द्विजानां दन्तानां राजौ श्रेण्यां राजदन्ता[2] मुख्यदन्ताश्चत्वारो दन्ता यत् श्रोत्रियविभ्रमं[3][4] शुक्ल-त्वं संबिभ्रति। श्रोत्रियः किल [अप्रतिग्राहित्वात् शुक्ल उच्यते। मुख्य-दन्ताश्च श्वेता वर्ण्यन्ते[5]। दन्तानां राजा राजदन्ताः इति[6] राजदन्तादिषु परम् (पा०२।२।३१) इति पूर्वनिपाते प्राप्ते, उपसर्जनं परं प्रयोक्तव्यम्। तदहमवैमि[7] शङ्के। एते चत्वारो दन्ताः शुक्ला मुक्ताफलानि। किंभूताः ?।

1 P. सेयम्; R सेयं मदेतादिति। 2 P, R सा इयं 3 BP, R om. राग°, ed. add. राग° 4 P. add. अनुप्रासो रूपकं श्लेषश्च ॥४५॥
1 P. राजौ; R राजौ द्विजानामिति। 2 P. राजमुख्या दन्ता° 3 P. यत् दन्ताः 4 P. add. श्रोत्रियविलासं 5 P. add. श्रोत्रियः छन्दोऽधीते 6 P. पूर्वनिपाते प्राप्ते here 7 R अवैमि

सर्ग ८ 29

उद्वेगस्य पूगीफलस्य रागादीनां च ताम्बूलादिकृतानां या मृजा मार्जनं घर्षणं तया अवदाता उज्ज्वला:[8]। अथ च श्रोत्रियाणां[9] द्विजानां ब्राह्मणानां पङ्क्तौ ये भवन्ति ते[10] मुक्तिं प्राप्नुवन्ति। वैराग्यात् क्रमेण तेऽपि उद्वेगेन संसारवैरस्येन या रागादीनां दोषाणां मृजा अपनयनं तेनाऽवदाता:। शमदमादिसाधनचतुष्टयसंपत्त्या इहामुत्रार्थ[फलोप]-भोगविरागेण च अतीतानागतवर्तमानानां कर्मणां ब्रह्मसंपत्त्या दग्धत्वात् प्रारब्धात्[11] प्रारब्धस्य प्रवृत्तफलस्य च कर्मणो भोगेन क्षीणत्वात्। यावद्देहपातं चक्रभ्रमवत् कार्मुकमुक्तेषुवच्च पूर्वसंस्कारेण वर्तमाना:[12] शास्त्राचार्यप्रसादात् ब्रह्मभावनकाले अविद्यानिवृत्त्या अवदाता:[13] नित्यशुद्धबुद्धमुक्तस्वभावा:। तथा च श्रुति: - तस्य तावदेव चिरं यावन्न[14] विमोक्ष्येऽथ संपत्स्ये[15] (छान्दो० ६।१४।२) इति। विमोक्षे संपत्स्यते इत्यर्थ:[16] ॥७६॥

शिरीषकोशादपि कोमलायां वेधा विधायाऽङ्गमशेषमस्या:।
प्राप्तप्रकर्ष: सुकुमारसर्गे समापयद्वाचि मृदुत्वमुद्राम् ॥७७॥

शिरीषेत्यादि[1]। वेधा ब्रह्मा[2] अस्या दमयन्त्या[3] अशेषम् अङ्गं विधाय[4] निर्माय सुकुमारसर्गे[5] कोमलसर्जने प्राप्तप्रकर्ष:[6] पर्याप्तकल्प: सन् मृदुत्वमुद्रां वाचि वाण्यां (११०९) समापयत्। कोमलत्वनिर्माणे शरीरमध्ये यत्किञ्चिद् रहस्यं गोपितमभूत् तन्मृदुत्वं तत्र[7]

8 [P₁ add (?)] पूग: क्रमुक इवाकौ तस्योद्वेग: पुन: फलम् ( ? ) 9 P₂ श्रोत्रिया: 10 P₁ किं 11 P₁ om. प्रारब्धात् 12 P₁ ब्रह्मभावनया यत्तस्मिन् काले तत् 13 P₁ om. अवदाता: 14 P₁ आपतताऽपि 15 P₁ संपत्स्यते 16 P₁ add. अनुप्रासो निदर्शना रूपकं श्लेषश्च समासोक्ति: ॥७६॥ 1 P₁ शिरी; P₂ शिरीषेति 2 P₁ P₂ om. ब्रह्मा 3 P₁ P₂ om. दमयन्ती 4 P₁ P₂ om. निर्माय 5 P₁ सुकोमल० 6 P₁ P₂ om. प्राप्तप्रकर्ष: 7 B तस्य; P₁ om. तत्र

सर्ग ७ 30

थाच्चि क्षिप्तम्। ईषदपरिसमाप्तः पर्याप्तः [पर्याप्तिकल्पः] समर्थकल्पः। किंभूतायाः? ॥ शिरीष[8]कोश[8]ात् कुड्मलात् अपि कोमलायाः[9] ॥४७॥

---

प्रसूनबाणाद्वयवादिनी सा काचिद्द्विजेनोपनिषत्पिकेन।
अस्याः किमास्यद्विजराजतो वा नाधीयते भैक्षभुजा तरुभ्यः॥४८॥

---

प्रसूनेत्यादि[1]। पिकेन द्विजेन पक्षिणा प्रसूनबाणस्य कामस्य[2] अद्वयम् अद्वैतं[3] वदतीत्येवंशीला सा[4] अपूर्वा काचित् अतिशयस्वरूपा उपनिषत् कामरहस्यं कामवेदभाष्यमस्याः[5] दम-यन्त्याः[6] आस्यमिव[7] द्विजराजश्चन्द्रः तस्मात् किं नाधीयते? अपि तु पठ्यते[8]। किंभूतेन? तरुभ्यो भैक्षं भिक्षाणां समूहं भुङ्क्ते तेन तथा। कोकिलोऽपि माधुर्यमेतन्मुखवाणीतः शिक्षतीत्यर्थः[9]। अथ च द्विजोऽपि[10] भैक्षभुक् पञ्चभिक्षाकारी, एकमेवाऽद्वितीयं ब्रह्म (छा० VI.ii.2) इतिवादिनी[11]मुपनिषदं द्विजराजात् ब्रह्मविदः सकाशादधीते[12] ॥४८॥

---

पद्माङ्कसद्मानमवेक्ष्य लक्ष्मीमेकस्य विष्णोः श्रयणात् सपत्नीम्।
आस्येन्दुमस्या भजते जिताब्जं सरस्वती तद्विजिगीषया किम्॥४९॥

---

पद्माङ्कसद्मानमित्यादि[1]। किं सरस्वती[2] देवी[3] अस्याः

---

8 B1 शरीष°; P1 शरीषपुष्पस्य; P2 °कुसुमस्य 9 P1 add. प्राप्ता [प्रकर्ष] इति पाठान्तरम्। अनुप्रासोऽतिशयोक्तिः परिसङ्ख्याऽपि ॥४७॥ / 1 P1 प्रसू।; P2 प्रसूनबाणेति। 2 P2 om. कामस्य 3 P1 P2 om. अद्वैतं 4 P1 om. सा 5 P1 P2 om. कामवेदभाष्यं 6 P1 P2 om. दमयन्त्याः 7 P1 °मेव 8 P1 add. वाराब्दः सँभो-वनायाम् 9 P1 शिक्षते; P2 [illegible] om. इत्यर्थः 10 P1 P2 om. अपि 11 B °वादिनीं 12 P1 add. अनुप्रासो रूपकं समासोक्तिर्व्यतिरेकोऽपि ॥४८॥
1 P1 पद्माङ्क।; P2 पद्माङ्केति। 2 P1 देवी सरस्वती 3 P1 लक्ष्मी... अवेक्ष्य here

आस्येन्दुं तस्या लक्ष्म्या विजिगीषया भजते ॥ किंभूतम्? ॥ जितमञ्जुकमलं येन स्मृतं तथा। [5]मुखेन कमलं जीयते, इन्दुना च। किं कृत्वा? ॥ लक्ष्मीं देवीं पद्मस्य अङ्कम् उत्सङ्गं सद्म यस्याः तां तथाविधामवेक्ष्य। किंभूताम्? ॥ तकस्य विष्णोः श्रयणात् सपत्नीम्। लक्ष्मीः परमेश्वरस्य हृदये वसति, सरस्वती च [7] कण्ठे। अतः सापत्न्यात् तस्याः पद्मं गृहं दृष्ट्वा [ततोऽपि] उत्कृष्टं दमयन्तीमुखचन्द्रं सरस्वती भजते [8] ॥ ४९॥

---

कण्ठे वसन्ती चतुरा यदस्याः सरस्वती वादयते विपञ्चीम्।
तदेव वाग्भूय मुखे मृगाक्ष्याः श्रोतुः श्रुतौ याति सुधारसत्वम् ॥ ५०॥

---

कण्ठे[1] इत्यादि। सरस्वती देवी[2] अस्या दमयन्त्याः[3] कण्ठे वसन्ती चतुरा[4] वीणावादनदक्षा यत् विपञ्चीं वीणां वादयते तदेव वादनं मृगाक्ष्याः मुखे वाग्भूय[5] वाणीरूपं भूत्वा श्रोतुः पुरुषस्य[6] श्रुतौ। श्रु कर्णे सुधारसत्वं याति। ऊर्यादिच्विडाचश्च (पा० I·iv·61) इति क्रियायोगे गतिसंज्ञा[यां] कुगतिप्रादयः (पा० II·ii·18) इति च्व्यन्तस्य नित्यं समासः। तत्पुरुषश्च समासो भवति। ततः समासे भाविनीति ल्यबादेशः। (का० IV·55) अवाक्रूपं सद् वाग्भवतीति च्विप्रत्ययः। [वादयते, इति अणावकर्मकाच्चित्तवत्कर्तृकाद् (पा० I·iii·88) इति विहितस्य कर्त्रभिप्रायक्रियाफलविवक्षायाऽऽत्मनेपदस्य वादस्य परस्मैपदस्य, न पादम्याङ्यमाङ्यस- परिमुहरुचिनृतिवदवसः (पा० I·iii·89) इति प्रतिषेधे, णिचश्च (पा० —

---

~~4 B इति तत् 5~~ 4 P1 सं 5 B कमलं येन मुखेन न जीयते 6 P2 om. किं भूताम् ॥ 7 P1 P2 om. च 8 P1 add. अनुप्रासो रूपकं समासोक्तिरुत्प्रेक्षा चालं

1 P1 कण्ठे ; P2 कण्ठे वसन्तीति। 2 P1 P2 om. देवी 3 P1 P2 om. दमयन्त्याः 4 P2 चातुरी 5 P1 वाग्रूपं 6 P1 P2 om. पुरुषस्य

सर्ग ७ 32

I. iii. 74)त्यात्मनेपदमेव भवति। सरस्वती विपञ्च्या देवताधिष्ठित-
त्वाच्चेतनत्वविवक्षा। तथा च सदैव तैः सततमथाऽनपायिभि-
र्निजाङ्गवन्मुजिदसेव्यतायुधैरिति हेतुभिश्चेतनाविहिरि( ? ति
) ति च हरेरायुधानां सदैवत्वं वर्णितम्। चित्तवत्त्वा-
विवक्षायां च देवरक्षाः किंशुका अविवक्षितकर्मत्वाद्, गतिबुद्धी-
(पाणि. iv. 52)त्यादिना कर्मत्वम्[7]॥५०॥

विलोकितास्या मुखमुन्नमय्य किं वेधसेयं सुषमासमाप्तौ।
धृत्युद्भवा यच्चिबुके चकास्ति निम्ने मनागङ्गुलियन्त्रणेव॥५१॥

[1]विलोकितास्येत्यादि। [2]किं वेधसा सुषमायाः शोभायाः
समाप्तौ परिपूर्णतायां [3]सत्यां मुखम् [4]उन्नमय्य विलोकितम् आस्यं
यस्याः सा तथा। इयं दमयन्ती सञ्जाता। यत् चिबुके मुख[5]स्याऽधो-
भागे मनाक् स्तोकम् अङ्गुल्या यन्त्रणा इव गर्तरूपा चकास्ति।
किंभूते? निम्ने। किंभूता? धृत्या [6]धारणेन उद्भवा [7]उत्पन्ना। [पिता]
किल अलङ्कृतमपत्यं प्रीत्या चिबुके धृत्वा विलोकयति[8]॥५१॥

प्रियामुखीभूय सुखी सुधांशु[1]रसत्ययं राहुभयव्ययेन।
इमां दधाराऽधरबिम्बलीलां तस्यैव बालं करचक्रवालम्॥५२॥ /ध

7 P1 add. अनुप्रासोऽतिशयोक्तिश्च। ; P2 add. द्वितीया विभक्तिः॥५०॥
1 P1 विलो। ; P2 विलोकितास्येति। 2 P1 इयं दमयन्ती here. 3 P2 om.
सत्यां 4 P2 उन्नमय्य 5 P1 मुखेऽधरस्याऽधोभागे 6 P2 धरणेन /उ
7 P1 P2 om. उत्पन्ना 8 B add. सर्वं कोऽपि। ; P1 add. लेपपुत्रिकादि
हस्तेन निमज्य निरीक्ष्यते। तत्राऽङ्गुलियन्त्रणा भवति। अनुप्रासोऽनु-
मानमुत्प्रेक्षा च॥५१॥ /1 P2 text असत्ययं

[2]प्रियामुखीत्यादि। अयं सुधांशुः प्रियामुखीभूय[3] सुखी सन् [4]राहुसकाशात् भयव्ययेन भयाभावेन [5]वसति। [6]तस्यैव चन्द्रस्य [7]बालं करचक्रवालं किरणजालम् इमाम् अधरबिम्बलीलां दधार। बालत्वात् रक्तम्। [ओष्ठोऽपि रक्तः।] [8]अन्योऽपि निर्भयत्वात् सुखी सन् वसति। तस्य स्थूलादिका गुणा भवन्ति, बालत्वादेः प्रभृति॥५२॥

---

अस्या मुखस्यास्तु न पौर्णमास्यं पूर्णस्य जित्वा महिमा हिमांशुम्।
भ्रूलक्ष्म खण्डं दधदर्धमिन्दुर्भालस्तृतीयः खलु यस्य भागः॥५३॥

---

[1]अस्या मुखस्येत्यादि। अस्याः पूर्णस्य मुखस्य पौर्णमासीसम्बन्धिनं हिमांशुं जित्वा महिमा न अस्तु, मा भवतु[2]। यस्य मुखस्य तृतीयो भागो भालः[3] ललाटम् अर्द्धं इन्दुः चन्द्रार्धम्। किं कुर्वन्[4] इन्दुः? भ्रुवावेव लक्ष्मणः कलङ्कस्य खण्डं दधत्। किल प्रदेशमात्रत्वेन द्वादशाङ्गुलं मुखम्। तस्य तृतीयो भागो ललाटं चतुरङ्गुलम्। तत्र [आकारविशेषेण प्रत्यक्षेण तथा] कलङ्कार्ध[5]लिङ्गेन चन्द्रार्धत्वम्। पूर्णचन्द्रे पूर्णः कलङ्कः। अर्द्धे अर्द्धम्। मुखस्य भागद्वयेन पूर्णश्चन्द्रः एको भाग अतिरिच्यते। तेन चन्द्रान्महत्त्वम्॥५

---

2 P1 प्रियामुखी।; P2 प्रियामुखीति। 3 P2 add. दमयन्तीवदनं (तुल्या), 4 P2 add. जयति। ~~[illegible]~~ केन? 5 P1 add. सुखी सन् 6 P1 add. जयति 7 P1 om. चन्द्रस्य 8 P1 P2 om. अन्योऽपि ... प्रभृति; P1 add. अनुप्रासोऽतिशयोक्तिर्व्यतिरेको निदर्शना च॥५२॥

---

1 P1 अस्याः।; P2 अस्या इति। 2 P1 add. इति काक्वा अपि तु भवति 3 B ललाटं भालः; P1 om. भालः 4 P1 add. भालोऽर्धम् 5 P1 कलङ्कार्धेन 6 P1 add. अनुप्रासो रूपकमतिशयोक्तिर्हेतुः समासोक्तिश्च॥५३॥

सर्ग ७ 34

व्यधत्त धाता मुखपद्ममस्याः सम्राजमम्भोजकुलेऽखिलेऽपि ।
सरोजराजौ सृजतोऽक्षियां नेत्राभिधेयावत एव सेवाम् ॥ ५४ ॥

[1]व्यधत्तेत्यादि । अस्या मुखपद्मं धातो[2] वेधा अखिलेऽपि अम्भोजकुले सम्राजं व्यधत्त । तासां मध्ये राजानं चक्रे । अत एव नेत्राभिधेयौ सरोजराजौ द्वौ अमुष्य मुखस्य सम्बन्धिनीं सेवां सृजतः । यः किल[3] सम्राट् भवति, स राजभिः सेव्यते[4] ॥ ५४ ॥

दिवारजन्यो रविसोमभीते चन्द्राम्बुजे निक्षिपतः स्वलक्ष्मीम् ।
आस्ये यदाऽस्या न तदा तयोः श्रीरेकश्रियेदं तु कदा न कान्तम् ॥ ५५ ॥

[1]दिवारजन्यो[2]रित्यादि । चन्द्रश्च अम्बुजं च उभे दिवारजन्यो: स्वलक्ष्मीं यदा अस्या आस्ये निक्षिपतः निक्षेपं कुरुतः । किंभूते चन्द्राम्बुजे ? । रवेः सोमाच्च भीते । दिवसे चन्द्रो रविभीतः । रजन्याम्बुजं[3] सोमाद्भीतम् । तदा तयो (द्वयो)र्विषये श्रीर्न भवति । इदं मुखं तु पुनः द्वयोर्मध्यादेकस्य[4] श्रिया कदा कान्तं न भवति । अपि तु सर्वदा कान्तम् ॥ ५५ ॥

1 P. व्यधा; P2 व्यधत्तेति । 2 P, P2 om. वेधा 3 P, P2 om. किल 4 P add. स्यात्(?)-यमर्थः । यस्य भागद्वयं चन्द्रः तस्य सम्पूर्णस्य चन्द्रान्महिमा किन्नु वक्तव्यः । अथवा न काकुव्याख्या । पूर्णस्य मुखस्य चन्द्रजये महिमा न अस्तु । मा भवत्विति निषेध एवार्थः । यतो यस्य भागद्वयेन चन्द्रस्तस्य पूर्णस्य चन्द्रजयेन को महिमा । अपि तु न कोऽपि । प्रियं दृष्ट्वा मुखं स्यादित्यादि-वक्ष्यमाणकल्पकतायामपि एव । अनुप्रासोऽतिशयोक्तिर्व्यतिरेकः प्रतीपं वा रूपकं च ॥ ५४ ॥ // 1 P. दिवा; P2 दिवारजन्योरिति । 2 P. चन्द्राम्बुजे 3 P. add. च 4 P. एकश्रिया 5 P. add. अनुप्रासो यथासंख्यमतिशयोक्तिर्व्यतिरेकः प्रतीपं वा; P2 add. भीतेरिति पाठान्तरम् ॥ ५५ ॥

सर्ग ७ 35

अस्या मुखश्रीप्रतिबिम्बमेव जलाच्च तावन्मुकुराच्च मित्रात् ।
अभ्यर्थ्य धत्तः खलु पद्मचन्द्रौ विभूषणं याचितकं कदाचित् ॥५६॥

---

अस्या[1] मुखेत्यादि । [खलु पद्मचन्द्रौ] अस्या मुखश्रियः प्रतिबिम्बमेव जलात्[2] तातात् पितुः सकाशात् मित्रा[3]न्मुकुरात् आदर्शाच्च याचित[कं] प्रार्थितं[4] विभूषणं कदाचित् अभ्यर्थ्य धत्तः । पद्मं [तातात्] जलात्, चन्द्रो मित्रात् आदर्शात्[5] याचेते[6] ॥५६॥

---

अर्काय पत्ये खलु तिष्ठमाना भृङ्गैर्मितामङ्गिभिरम्बुकेलौ ।
भैमीमुखस्य श्रियमम्बुजिन्यो याचन्ति विस्तारितपद्महस्ताः ॥५७॥

---

अर्काये[1]त्यादि । खलु[2] शङ्के अम्बुजिन्यः भैमीमुखस्य श्रियं शोभां याचन्ति । किंभूताः ? विस्तारिताः[3] विस्तारीकृताः पद्मान्येव हस्ताः करा[4] याभिः तास्तथा । पुनः किंभूताः ? अर्काय पत्ये तिष्ठमानाः । स्वाभि[5]प्रायं कामाविर्भावं प्रकाशयन्त्यः । [श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः (पा० I.iv.34) इति सम्प्रदानम् । प्रकाशनस्थेयाख्ययोश्च (पा० I.iii.23) इत्यात्मनेपदम् । कौमारे तु] प्रतिज्ञानिर्णयप्रकाशनेषु स्थः (III.ii.42.13) इत्यात्मनेपदं प्रकाशनेऽर्थे । किंभूतां श्रियम् ? अम्बुकेलौ जलकेलिकाले भृङ्गैरेव भ्रमरैरेव[6] अङ्गिभि–

---

1 P. अस्या मुख ; P2 अस्या मुखेति । 2 P. जल° 3. P2 om. मित्रात् 4 P. प्रार्थितकं 5 P. add. शत्रौ 6 P. P2 याचेते ॥ P. add. याच्ञया आप्तं याचितकम् । अपमित्ययाचिताभ्यां कक्कनौ (पा० IV.iv.21) । यथा– सङ्ख्यमुत्प्रेक्षा समासोक्तिरतिशयोक्तिश्च ॥५६॥

1 P. अर्का ; P2 अर्काय पत्ये इति । 2 B P2 खलु शङ्के add. पुनः किंभूताः ? ॥ 3 P. P2 om. विस्तारीकृताः 4 P. P2 om. करा 5 P. स्वाविर्भावं 6 P. P2 om. भ्रमरैरेव

सर्ग ७ 36

नयनैः स्मितां द्दष्ट्वाम् । कामिनी भर्तृसन्निधौ परविभूषणेनाऽपि शृङ्गारवती भवति ॥५७॥

अस्या मुखेनैव विजित्य नित्यस्पर्द्धी मिलत्कुङ्कुमरोषभासा।
प्रसह्य चन्द्रः खलु नह्यमानः स्यादेव तिष्ठन् परिवेषपाशः ॥५८॥

अस्या मुखेनेत्यादि । खलु चन्द्रः अस्या मुखेनैव विजित्य प्रसह्य बलात्कारेण नह्यमानः बध्यमानः सन् तिष्ठ(।।।१)-न् परिवेष एव पाशो बन्धनं यस्य सः तथाविधः स्यादेव । यतः नित्यस्पर्द्धी अयं परिवेषो न भवति । किन्तु बन्धनपाशः । किं-भूतेन? । मिलत् यत् कुङ्कुमं तदेव रोषभा यस्य तेन तथा ॥५८॥

विधोर्विधिर्बिम्बशतानि लोपं लोपं कुहूरात्रिषु मासि मासि।
अभङ्गुरश्रीकमिमं किमस्या मुखेन्दुमस्थापयदेकशेषम् ॥५९॥ कि

विधोरित्यादि । विधिर्ब्रह्मा मासि मासि कुहूरात्रिषु अमावास्या[निशासु] विधोः बिम्बशतानि लोपं लोपं विलुप्य विलुप्य [किम्] अस्या मुखेन्दुम् अभङ्गुरश्रीकं निष्कलशोभम् [इमम्]

7 P, P2 om. नयनैः 8 P1 परभूषणे° 9 P1 add. अर्कीय पत्न्ये सिष्ठमाना इति (चिन्त(सो)पयितुमुद्यता । अर्क भैमीमुखस्थ्रियं याचन्तीत्यन्यः । रूपकमुत्प्रेक्षा समासोक्तिश्च ॥५७॥ // 2 P1 अस्याः ; P2 अस्या मुखेनेति । 2 P1 P2 om. बला-त्कारेण 3 P1 पाश आबन्धनं 4 P1 om. यतः ; P2 यततः 5 P2 add. यत् 6 P1 add. अनुप्रासो रूपकमुत्प्रेक्षा समासोक्तिरतिशयोक्तिश्च ॥५८॥

2 P1 विधोः ; P2 विधोर्विधिरिति । 2 B P2 अमावास्यायां ——

एकमेव शेषम् अस्थापयत्। [3]कुहूशब्देन नष्टचन्द्रत्वमुच्यते।
सरूपाणामेकशेष एकविभक्तौ (पा० I. ii. 64)[4] ॥ ५९॥

कपोलपत्रान्मकरात् सकेतुर्भ्रूभ्यां जिगीषुर्धनुषा जगन्ति।
इहावलम्ब्यास्ति रतिं मनोभूरज्यद्वयस्यो मधुनाधरेण ॥ ६०॥

[1]कपोलपत्रादित्यादि। मनोभूः इह दमयन्त्यां रतिमवलम्ब्य क्रीडां प्राप्य अस्ति। अस्य च रतिं कामवधूम्। किंभूतः?
कपोले पत्रात् पत्रवल्ली[2]भूतात् मकरात् सकेतुः सध्वजमकरः।
भ्रूभ्यामेव धनुषा जगन्ति[3] जिगीषुः। तथा मधुना मधुतुल्यस्वादेन अधरेण ओष्ठेन रज्यन् वयस्यो मित्रं यस्य स तथा। मधुर्वसन्तः।
अधरो अधरितः अनुच्चारः अनुरागयुक्तश्चास्य। ओष्ठोऽपि रक्तः[4]।
कुषि[5]रञ्जोः प्राचां श्यन् परस्मैपदं च (पा० III. i. 90) इति [परस्मैपदम्]
तथा श्यन् विकरणः। [अन्ये तु अस्ति रतिरित्यपि पठन्ति][6] ॥ ६०॥

वियोगबाष्पाञ्चितनेत्रपद्मच्छद्मार्पितोत्सर्गपयःप्रसूनौ।
कर्णौ किमस्या रतितत्पतिभ्यां निवेद्यपूपौ विधिशिल्पमीक्षे ॥ ६१॥

[1]वियोगेत्यादि। [[2]किम्] अस्याः[3] कर्णौ रत्यै[4] तस्याः पत्ये कामाय च उभाभ्याम् अर्घे निवेद्यौ च तौ पूपौ चेति निवेद्यापूपौ

3 B om. कुहू०...०मुच्यते। M P add. अनुप्रासोऽतिशयोक्तिर्व्यतिरेक उत्प्रेक्षा च ॥ ५९॥ // 1 P कपो; B कपोलेति। 2 P om. पत्रवल्लीभूतात्; B ०रूपात् 3 P add. भुवनानि 4 B परित्यक्ताः 5 B कुषिरञ्जिभ्यां 6 P add. रूपकमतिशयोक्तिरिति। रज्यन् मधुरशब्दः श्लिष्टः ॥ ६०॥
1 P वियोगा; B वियोगेति। 2 P किं om. कर्णौ 3 B अस्य 4 P रतेः —

रूपकौ ( ९ ) इति। इह विधेर्ब्राह्मणः शिल्पमिदं निर्माणं यथा शास्त्रेषु आदित्यादिग्रहेभ्यो विधिना रूपके नैवेद्यानि निर्मितानि। तथा आभ्यामपि रूपौ। किंभूतौ!! वियोगबाष्पैरञ्चिते रूगिते [अङ्किते] ये नेत्रपक्ष्मे तयोः ध्वनिना अर्पितम् उत्सर्गपयः सङ्कल्पोदकं प्रसूने पुष्पद्वयं च ययोस्तौ] तथा। अनूपोपरि उदकं पुष्पं च मुच्यते। कर्णान्तविश्रान्तत्वात् कर्णयोरिवमुत्प्रेक्षा ॥ ६१॥

---

इहाविशद्येन पथाऽतिवक्रः शास्त्रौघनिष्यन्दसुधाप्रवाहः।
सोऽस्याः श्रवःपत्रयुगे प्रणालीरेखेव धावत्यभिकर्णकूपम् ॥ ६२॥

---

इहाविशदित्यादि। इहाऽस्यां दमयन्त्यां विषये येन पथा मार्गेणाऽतिवक्रः वक्रोक्तिभिर्विषमः शास्त्रौघस्य यो निष्यन्दः सारः स एव सुधाप्रवाहः अविशत् प्रविष्टः। स प्रवाहमार्गः अस्या दमयन्त्याः श्रवःपत्रयुगे पत्रयुगले प्रणालीरेखा इव अभिकर्णकूपं धावति। प्रणालमार्गोऽपि वक्रो भवति। सोऽपि कूपं गर्तं प्रति धावति॥६२

---

अस्या यदष्टादश संविभज्य विद्याः श्रुती दध्रतुरर्धमर्धम्। /म
कर्णान्तरुत्कीर्णगभीरलेखः किं तस्य सङ्ख्यैव न वा नवाङ्कः॥६३॥ /रे

---

अस्या यदित्यादि। यदस्याः श्रुती कर्णौ अष्टादश।

---

5 P, P2 om. इति 6 P2 किंभूतम्!! वियोगबाष्पैरञ्चितं रूजितम् अङ्कितं यन्नेत्रपक्ष्मद्वयं तस्य etc. 7 B रूपयोरपि 8 P om. पुष्पं 9 P, add. अनुप्रासश्च रूपकम् ॥६१॥/ 1 P2 tr. त्यधि° 2 P, इहा; P2 इहाविशदिति! 3 P, add. अथवा निर्झरः 4 P, P2 om. दमयन्त्याः 5 P, श्रवसे; P2 श्रवसोः 6 P, add. रूपकमपह्नुतिरतिशयोक्तिर्वा उपमा उत्प्रेक्षा च ॥६२॥
1 B अस्या यदित्यादि; P, अस्याः; P2 अस्या इति। 2 P, दमयन्त्याः

सर्ग ८ 39

विद्या: संविभज्याऽर्धम् अर्धं दध्रतु: । चत्वारो वेदा:, षडङ्गानि, पुराणं, न्यायो, मीमांसा, धर्मशास्त्रम्, आयुर्वेदो, नाट्यवेदो[3] धनुर्वेदो[4]ऽर्थशास्त्राणि नीतिप्रभृतीनि । किं तस्य अर्द्धस्ये[5] सङ्ख्या एव अयं नवसङ्ख्याङ्क: वा अथवा न भवति । अपि तु स एव । किंभूत:? । कर्णपुटस्य[6] अन्तर्मध्ये उत्कीर्णा[7] उल्लिखिता गम्भीरा लेखा यत्र स तथा । यादृशी नवाङ्कस्य रेखा भवति, तादृशी कर्णद्वयमध्ये रेखाऽस्ति[8] ॥६३॥

मन्येऽमुना कर्णलतामयेन पाशद्वयेन च्छिदुरेतरेण ।
एकाकिपाशं वरुणं विजिग्येऽनङ्गीकृतायासलती रतीश: ॥६४॥

मन्येऽमुनेत्यादि[1] । अहम् एवं मन्ये । रतीश: काम: अमुना कर्णलतामयेन पाशद्वयेन च्छिदुरेतरेण[2] अत्रुटनशीलेन वरुणं विजिग्ये । यत: एकाकी एक एव पाशो यस्य तं तथा । किंभूत:? । अनङ्गीकृता आयासस्य लति: परम्परा येन स तथा । अनायासेनैवेत्यर्थ: । एकादाकिनिश्चासहाय[3] (पा॰ V.iii.53) इत्याकिप्रत्यय: । विपराभ्यां जे: (पा॰ I.iii.19) इत्यात्मनेपदम्[4] ॥६४॥

आत्मैव लालस्य चतुर्भुजस्य जातभ्रातुर्दोर्युचित: स्मरोऽपि ।
तच्चापयो: कर्णलते भ्रुवोर्ज्ये वंशत्वगंशौ चिपिटौ किमस्या: ॥६५॥

आत्मैव[1] लालस्येत्यादि । स्मरोऽपि उचित: युक्त

3 P. धनुर्वेदो नाट्यवेदो M ‖ 4 धर्मवेदो 5 P. अर्द्धस्याऽर्द्धस्य 6 P. कर्णपटस्य 7 P. om. उत्कीर्णा 8 P. add. अनुप्रास उत्प्रेक्षा । पूर्वश्लोकापेक्षया आक्षेपोऽपि ॥६३॥
1 P. मन्ये; P. मन्य इति । 2 P. add. छिदुरादितर: तेन छिदुरेतरेण 3 P. ⟨…⟩निचा॰ M P. add. अनुप्रासोऽपह्नुतिर्व्यतिरेक: ॥६४॥ 1 P. आत्मै; P. आत्मैवेति ।

चतुर्भुजो जात:। किंभूत:?। तातस्य पितुश्चतुर्भुजस्य[2] श्रीकृष्णस्य आत्मैव जात:। आत्मा वै जायते पुत्र:( १ ) इति श्रुते:। अतोऽस्या: कर्णलते कर्णलतिकाद्वयं तस्य कामस्य द्वयोश्चापयो[3]र्भ्रुवो: [द्वे] ज्ये मौर्व्यौ। कामस्य[4] चापयो: कर्णलतिके ज्ये इत्यर्थ:। किंभूते?।[5] चिपिटौ[6] लतिकापृथुलौ भागौ तौ[7] किं वंशस्य त्वच:[8] अंशौ भागौ। वंशत्वक् तक्षित्वा तक्षित्वा चिपिटा क्रियते। धनुषो मौर्वी[9] चतुर्भुजत्वाच्चापद्वयम्। अथवा[10] अस्या: कर्णलते [ए]व तच्चापयो: चिपिटौ वंशत्वगंशौ कर्णलतिके कामस्य धनुषोऽपि चिपिटौ वंशविम्बफाडिके अस्या भ्रुवौ ज्ये भूलते मौर्व्यौ इति। तदा भ्रुवोर्ज्ये इति पाठ:[11] ॥६५॥

---

ग्रीवाद्भुतैवाबहुशोभिताऽपि प्रसाधिता माणवकेन सेयम्।
आलिङ्ग्यतामप्यवलम्बमाना सुरूपतामागाखिलोर्ध्वकाया॥६६॥

---

ग्रीवाद्भुतैवेत्यादि[1]। सा इयं ग्रीवा अद्भुतैव। यत: अबहुना कण्ठिकया शोभिताऽपि माणवकेन हारेण प्रसाधिता। या किल [न] बहु[ना] शोभिता भवति सा कथं माणवकेन बटुना प्रसाध्यते इति विरोधादाश्चर्यम्। तथा आलिङ्ग्यताम्। अवलम्बमाना [तथा सुरूपतां शोभनरूपताम्] अकारप्रश्लेषे [सुरूपतां] प्राणरूपतां भजते। अखिल ऊर्ध्वकायो यस्या: सा तथा। ग्रीवैकदेशे[2]

---

2 P₂ om. चतुर्भुजस्य 3 P₂ om. चापयो: 4 P₁P₂ om. कामस्य... किंभूते?। 5 P₁P₂ add. यौ 6 B चिविटौ 7 P₂ om. तौ 8 P₂ त्वक् अंशौ भागौ 9 P₁ add. प्रान्ते 10 P₁P₂ om. अथवा... इति पाठ:। 11 P₁ add. काव्यलिङ्गमुत्प्रेक्षा रूपकं च ॥६५॥

1 P₁ ग्रीवाद्भुत; P₂ ग्रीवेति। 2 P₁ ग्रीवाख्ये कायैकदेशे कायशब्द:।

सर्ग ७ 41

कायशब्दः। अथ च आलिङ्ग्यं नाम तथा ऊर्ध्वकं नाम वाद्यभेदः। या किलाऽऽलिङ्ग्यतामालम्बते सा कथं सुरूपताभाक्। अखिलम् ऊर्ध्वकं यस्याः सा तथा। अखिलोर्ध्वका या इति भिन्नं पदम्। अथ वा सुरूपताभाक् अखिल ऊर्ध्वकस्य वाद्यस्य आय आगमनं यत्र सा तथाविधा कथं भवति। आलिङ्ग्यं वाद्यम् [अन्यत्, ऊर्ध्वकं] वाद्यमन्यत् इति विरोधाभासालङ्कारार्थम्। [आलिङ्गितामिति पाठे आलिङ्गनमालिङ्गः सोऽस्याऽस्तीति इन्प्रत्ययः॥ ६६॥]

---

कवित्वगानप्रियवादसत्यान्यस्या विधाता व्यधिताऽधिकण्ठम्।
रेखात्रयन्यासमिषादमीषां वासाय सोऽयं विबभाज सीमाः॥ ६७॥

---

कवित्वगाने (।।२७)त्यादि। विधाता अस्या अधिकण्ठं कवित्वं गानं प्रियवादं सत्यं च एतानि व्यधित। कण्ठे व्यधितेति अनेन तुल्ये वाचकत्वे अव्ययीभावस्याऽस्ति कश्चिद्विशेषः। यश्चमत्कारी कारी तत्स्वामीनां चतुर्णां पृथक् पृथक् वासाय सोऽयं विधाता सीमाः विबभाज विभक्तवान्। कस्मात्? रेखात्रयस्य न्याससमिषात्। यदाह- रेखात्रयाङ्किता ग्रीवा कम्बुग्रीवेति कथ्यते ( ... ) [इति]। यत्र चत्वारः प्रदेशा विभज्यन्ते तत्र [मध्ये] त्रयः मेढ्का भवन्ति॥ ६७॥

---

3 P2 om. अथ च 4 P1 add. वाद्यभेदः 5 P1P2 om. अखिलोर्ध्वका 6 P1 add. न 7 P1 add. विरोधः॥६६॥

1 P2 read व्यधिता° 2 P1 कवि:; P2 कवित्वेति। 3 P1 सीमा सीम- मर्यादा 4 B शेढ्का; P1 सेढका; P2 मेढका; edn. मेढ्का 5 P1 add. अनुप्रासोऽपह्नुतिश्च॥६७॥

बाहू प्रियाया जयतां मृणालं द्वन्द्वे जयो नाम न विस्मयोऽस्मिन् ।
उच्चैस्तु तच्चित्रममुष्य भग्नस्याऽऽलोक्यते निर्व्यथनं यदन्तः ॥६८॥

बाहू[1] प्रियाया[ः] इत्यादि । प्रियाया बाहू मृणालं जयताम् । नाम अभ्युपगमे । अस्मिन्नर्थे न विस्मयः यत् द्वन्द्वे जयः द्वाभ्यामेको जीयते । तु पुनस्तदुच्चैश्चित्रम् । यदमुष्य भग्नस्य[2] मृणालस्य जितस्य अन्तर्मध्ये निर्व्यथनं व्यथाया अभावो वि[3]लोक्यते । अथ [च] मृणालखण्डभङ्गोऽ[4]न्तर्निर्व्यथनं छिद्रम् आलोक्यते[5] ॥६८॥

अजीयताऽऽवर्त्तशुभंयुनाभ्यां दोर्भ्यां मृणालं किमु कोमलाभ्याम् ।
निःसूत्रमास्ते घनपङ्कमृत्सु मूर्त्तासु नाऽकीर्तिषु तन्निमज्जत् ॥६९॥

अजीयते[1]त्यादि । आवर्त्तः पयसां भ्रमस्तद्वत् शुभंयुः शुभसंयुता नाभिः यस्याः[2] तथाविधायाः तस्या दोर्भ्यां बाहुभ्यां कोमलाभ्यां किमु[3] मृणालम् अजीयत । अ[4]थवा अस्या आभ्यां दोर्भ्यां मृणालम् अजीयत । किंविशिष्टाभ्यां दोर्भ्यां नु? । आवर्त्तशुभंयुना आविर्भूतलिङ्गत्वात् एकत्वम् । तन्मृणालं घनस्य पङ्कस्य[5] मृत्सु /प्र
मृ[6]त्तिकास्वेव मूर्त्तासु अकीर्तिषु निमज्जत् किं न आस्ते ? । अपि तु जितत्वादकीर्तिमज्जनम् । किंभूतम् ? । निःसूत्रम्[7] । जितत्वात् निःशब्दम् । निभृतम् । अथ मृणालं पङ्कस्थितं सूत्ररहितं भवति । बहिराकृष्य भग्नं

1 P1 बाहू ; P2 बाहू इति । 2 P1 भग्नमृणालस्य 3 B व्यलो° 4 B अपि अति°
5 P1 add. अनुप्रासो व्यतिरेकः समासोक्तिः श्लेषश्च ॥६८॥
1 P1 अजीयता ; P2 जयतेति । 2 P1 तथास्तथाविधायाः ; P2 यथास्तस्य तथाविधायाः 3 B किन्नु 4 P1 P2 om. अथवा ... एकत्वम् । 5 P2 om. पङ्कस्य 6 P1 मृत्तिका° 7 P2 om. निःसूत्रम्

\\ 43

सर्ग ८

सन्तं स्मरतनुं स्वाप्नं भवति[8] ॥६९॥

रज्यन्नखस्याङ्गुलिपञ्चकस्य मिषादसौ हैङ्गुलपञ्चतूणे।
हैमैकपुङ्खास्ति विशुद्धपर्वा प्रियाकरे पञ्चशरी स्मरस्य ॥७०॥

[1] रज्यन्नित्यादि। प्रियायाः करे एव हैङ्गुलं रक्तं पञ्च[2] तदेव तूणम्। हिङ्गुलेन रक्तं हैङ्गुलम्। हिङ्गुलपञ्चतूणे इति पाठे मध्यपदस्य रक्तस्य लोपः। तस्मिन् हस्ततूणे[3] अङ्गुलिपञ्चकस्य मिषात् असौ स्मरस्य पञ्चानां शराणां समाहारः पञ्चशरी आस्ति विद्यते। किंविशिष्टस्य? रज्यन्तो नखा[4] यस्य तस्य[5] तथा। किंभूता? हैमः[6] सौवर्णः[7] एकः पुङ्खो यस्याः सा[7] तथा। नखानां रागात् पुङ्खसादृश्यम्। तथा विशुद्धानि[8] पर्वाणि यस्याः सा तथा। अङ्गुलिपर्वाणि च शुद्धानि ऋजूनि शराङ्गं[9] ॥७०॥

अस्याः करस्पर्द्धनगर्द्धितर्द्धिर्बालत्वमाप[1] खलु पल्लवो यः।
भूयोऽपि नामाधरसाम्यगर्वं कुर्वन् कथं वाऽस्तु न स प्रवालः ॥७१॥

[2] अस्याः करेत्यादि। यः[3] खलु पल्लवः बालत्वम्

8 B क्रियते 9 l1 add. अनुप्रासो व्यतिरेक उपमारूपकसमासोक्तिः श्लेषश्च ॥६९॥

1 B this verse aft. अस्याः कर° etc; 2 l1 रज्या; l2 रज्यन्निति। 2 l1 मिवमिव; l2 मेव 3 l1 हस्ते तूणे 4 B l2 यत्र 5 l1 om. तस्य 6 B सौवर्णो हैमः 7 l1 om. सा 8 l1 शुद्धानि 9 l1 add. अपह्नुतिः रूपकम् ॥७०॥

1 l2 too- °गर्द्धि° 2 l1 अस्या; l2 अस्याः करेति। 3 l1 l2 खलु यः

आपत् । किंभूत: ? । अस्या: करस्य हस्तस्य स्पर्द्धनेन गार्द्धिता अभिलषिता वृद्धिर्येन स तथा । [गार्द्धितवृद्धिरिति पाठान्तरे][4] दमयन्ती हस्तस्पर्द्धयाम् अहमपि प्रतिष्ठां लभे इति दुराशया ।[6] अथ च बालपल्लवस्य करसाम्यं[5] नाम अहो स भूयोऽपि पल्लवोऽधरेण साम्यस्य गर्वं कुर्वन् कथं वा[7] प्रवालो नाऽस्तु । तस्य प्रवाल इति संज्ञा । अथ च प्रकृष्टो बाल:[8] ॥७१॥

अस्यैव सर्गाय भवत्करस्य सरोजसृष्टिर्मम हस्तलेख: ।
इत्याह धाता हरिणेक्षणायां किं हस्तलेखीकृतया तया स्याम् ॥७२॥

अस्यैवेत्यादि[1] । किं धाता[2] ब्रह्मा अस्यां हरिणेक्षणायां हस्ते लेखीकृतया रेखारूपया । अथ च हस्ते[3] लेखीकृतया हस्तोल्लेखीकृतया[4] तया[5] सरोजसृष्ट्या[6] इति आह । इतीति किम् ? । मम सरोजानां सृष्टि: अस्यैव भवत्या: करस्य सर्गाय हस्तलेख: हस्तोल्लेख:[7] ॥७२॥

किं नर्मदाया मम सेयमस्या दृश्याभितो बाहुलतामृणाली ।
कुचौ किमुत्तस्थतुरन्तरीपे स्मरोष्मशुष्यत्सरबाल्यवार: ॥७३॥

किं[1] नर्मदाया इत्यादि । किम् इयम्[2] अस्या दमयन्त्या

4 P2 गार्द्धि-- पाठान्तरम् alt. करसाम्यं 5 P1 हस्तस्य 6 B इत्याशया 7 P1P2 बाल्य: 8 P1 add. अनुप्रास उत्प्रेक्षा समासोक्ति: ॥७१॥
1 P1 अस्यै ; P2 अस्यैवेति । 2 B ब्रह्मा धाता वेधा 3 P2 हस्तीकृतया 4 P2 om. हस्तोल्लेखीकृतया 5 P1 ~~add.~~ om. तया 6 B P2 ०सृष्ट्या 7 P1 add. तथेति प्रकाशविषय: तच्छब्द: । उत्प्रेक्षाऽतिशयोक्तिश्च । हस्तलेखीकृतयेति श्लिष्टम् ॥७२॥ 1 P1 किं नर्मदा ; P2 किं नर्मेति । 2 P1 om. इयम् ; P2 इत्यम्

सर्ग ७ 45

मम नर्म परिहासकेलिं ददातीति नर्मदा तस्यास्तथाविधायाः अभितः उभयतः बाहुलता[4] इव मृणाली दृश्या। नर्मदायां नद्यां किल मृणाली वर्ण्यते॥[5] किम् अस्याः कुचौ इव अम्बरीपे द्वीपे उत्तस्थतुः। [6]द्वयन्तरुपसर्गेभ्योऽप ईत् (पा० ६।३।९७) इतीत्वम्। किंभूतायाः? स्मरोष्मणा। शुष्यन्तरं बाल्यमेव वाः पानीयं यस्याः तस्यास्तथा। वार्शब्दोऽयं व्यञ्जनान्तः। नर्मदाया अपि यथा यथा वारि शुष्यति तथा तथा द्वीपमुत्तिष्ठति[7]॥७३॥

---

तालं प्रभु स्यादनुकर्तुमेतावुत्थानसुस्थौ पतितं न तावत्।
परं च नाश्रित्य तरुं महान्तं कुचौ कृशाङ्ग्याः स्वत एव तुङ्गौ॥७४॥

---

[1]तालं प्रभु स्यादिति। [2]तावद्भूमौ पतितं तालफलम् एतौ कुचौ अनुकर्तुं न प्रभु[3] स्यात्[4] न समर्थं स्यात्। यत उत्थानेन उद्गमेन[5] सुस्थौ। इदं पतितं स्तनौ चोत्थितौ ततः एव साम्यम्?। परमन्यत् महान्तम् उच्चैस्तरं[6] तालं वृक्षम् आश्रित्य। पराश्रयेण बलवत् वृक्षोपरि स्थितं तालं[7] च न[8] एतौ उपमातुं प्रभु[9]। यतः कृशाङ्ग्याः कुचौ स्वत एव पराश्रयव्यतिरेकेणैव तुङ्गौ[10] उन्नतौ[11]॥७४॥

---

4 P1 बहुलता 5 P1 add. दमयन्त्याः 6 P1 om. द्वयन्त॰...॰त्वीत्वम्। 7 P1 add. अनुप्रास उत्प्रेक्षा रूपकम्। नर्मदाया इति च श्लिष्टम्॥७३॥

1 P1 तालं; P2 तालमिति। 2 B तावत्... चोत्थितौ at the end. 3 B स्यात् here 4 B भवेत् 5 P2 उद्गमनेन 6 P1, P2 ॰त्तरं 7 B ॰च तालं 8 P1 न after उपमातुं 9 BP1 add. विसर्गः 10 P2 उन्नतौ तुङ्गौ 11 P1 add. पतितः पापी किल उत्थानसुस्थं धार्मिकमनुकर्तुं न प्रभुः। काव्यलिङ्गं समासोक्तिर्व्यतिरेकश्च॥७४॥

एतत्कुचस्पर्द्धितया घटस्य ख्यातस्य शास्त्रेषु निदर्शनत्वम्।
तस्माच्च शिल्पान्मणिकादिकारी प्रसिद्धनामाजनि कुम्भकारः॥७५॥

एतत्कुचेत्यादि[1]। घटस्य शास्त्रेषु तर्केषु मीमांसादिषु[2] यन्निदर्शनत्वम्[3] अन्वयेन व्यतिरेकेण[च] दृष्टान्तत्वं तत् एतस्याः कुचयोः स्पर्द्धितया ख्यातस्य लोके शास्त्रे[च] प्रसिद्धस्य सतः। अनित्यः शब्दः। कृतकत्वात्। घटवदिति नैयायिकाः। नित्यः शब्दः। अकृतत्वात्। यन्नित्यं न भवति तदकृतमपि न भवति यथा घट इति मीमांसकाः। किञ्च तस्मादेव प्रख्यातघटकरणलक्षणात् शिल्पात् कर्मणः विज्ञानात् सकाशात्[4] हेतोः लोके[5]ऽपि [यो] मणिकघटीकरकशरावादिकारी। आदिशब्दात् घटकरकशरावादि[6]कारी तत्करणशीलः स कुम्भकारः इति प्रसिद्धनामाऽजनि। दमयन्तीकुचस्पर्द्धितया आख्यातत्वात्॥७५॥

गुच्छावली[1]स्वच्छतमोदबिन्दुवृन्दाभमुक्ताफलफेनिलाङ्के।
माणिक्यहारस्य विदर्भसुभ्रूपयोधरे रोहति रोहितश्रीः॥७६॥

गुच्छावलीत्यादि[2]। विदर्भसुभ्रूपयोधरे माणिक्यस्य हारस्य रोहितश्रीः लोहिता शोभा रोहति प्रादुर्भवति। माणिक्यानां सरागत्वात्। किंभूते। गुच्छावल्या हारे[5] स्वच्छतमानि उदबिन्दु—

1 P. एतत्; P2 एतदिति। 2 P2 add. च 3 P. तदेव तस्याः 4 P2 om. सकाशात् 5 B अः कोऽपि 6 P1 add. काव्यलिङ्गमतिशयोक्तिश्च॥७५॥
1 P2 text गुच्छालय 2 P1 गुच्छावली; P2 गुच्छेति। 3 P1 माणिक्य; 4 P2 om. माणिक्यस्य.... गुच्छावलिसहितो 4 P2 om. प्रादुर्भवति
5 P1 add. गुच्छालयेति पाठे गुच्छालयानि ——

वृन्दाभानि यानि मुक्ताफलानि तैः फेनिलः फेनयुक्त इव अङ्को मध्यं यस्य तत्र तथा। उदकस्योद[6] (पा० VI iii 57) इत्यधिकारे, मन्थोदनसक्तुबिन्दुवज्रभारहारवीवधगाहेष्विति (पा० VI iii 60) उदादेशः। फेनादिलच्चेति (पा० V ii 99) इलच्। मौक्तिकमयगुच्छावलिसहितो[7] माणिक्यहारोऽस्तीत्यर्थः। अथवा मणिमध्ये[8] मौक्तिकग्रथनात्। अथ च पयोधरेऽपि[9] मेघे[10] रोहितस्य ऋजुनः इन्द्रधनुषः शोभा भवति[11]। [12]बिन्दवः फेनं च ॥ ७६॥

निःशङ्कसङ्कोचितपङ्कजोऽयमस्यामुदीतो मुखमिन्दुबिम्बः।
चित्रं तथापि स्तनकोकयुग्मं न स्तोकमप्यञ्चति विप्रयोगम् ॥७७॥

[1]निःशङ्केत्यादि। अयम् [2]अस्यां मुखं मुखलक्षण इन्दुबिम्ब उदीतः उत्पन्नः। किंभूतः? निःशङ्कं सङ्कोचितानि पङ्कजानि [3]येन स तथा। तत् पुनश्चित्रम् आश्चर्यम्। यत् तथाऽपि चन्द्रोदयेऽपि [4]स्तनावेव कोकौ[5] तयोर्युग्मं [6]मिथुनं स्तोकमपि विप्रयोगम् अन्तरं भेदं विरहं वा न अञ्चति न प्राप्नोति[7] ॥७७॥

आभ्यां कुचाभ्यामिभकुम्भयोः श्रीरादीयतेऽसावनयोर्न ताभ्याम्।
भयेन गोपायितमौक्तिकौ तौ प्रव्यक्तमुक्ताभरणाविमौ यत् ॥७८॥

6 P1 उदस्यो० 7 P1 ०संयुक्तो 8 B ०बन्धो 9 P1 P2 om. अपि 10 B मध्ये 11 BP2 भवन्ति 12 P1 add. उदबिन्दुवृन्दफेनिलोऽङ्कश्च। अनुप्रास उपमा श्लेषश्च ॥७६॥

1 P1 निशं; P2 निःशङ्केति 2 P1 अस्या 3 P1 पद्मानि M P2 नवैव 5 P1 कोकयोः 6 P1 मिथुनं युग्मं 7 P1 add. अनुप्रासो रूपकं विशेषोक्तिश्च ॥७७॥

अभ्यामित्यादि[1] । आभ्या कुचाभ्याम् इभस्य हस्तिनः कुम्भयोः श्रील्र्क्ष्मी[3]राहीयते । [4][न तु वैपरीत्यं किमिति न स्यादित्याह] सा तु[5] शोभा तयोः कुम्भ[स्थल]योः क्व वर्त्तते । अपि[6] तु न कुत्राऽपि[7] । यत्तौ[8] हस्तिकुम्भौ[9] ताभ्यां कुचाभ्यां[10] सकाशात् भयेन गोपाद ।।२ ७)यितानि निगूढीकृतानि मौक्तिकानि याभ्यां[11] तौ[12] तथा । इमौ कुचौ पुनः प्रव्यक्तानि मुक्ताभरणानि हारादीनि यत्र तौ तथा । भद्रजातीयस्य हस्तिनः कुम्भस्थले मौक्तिकानि मांसमध्ये गुप्तानि भवन्ति । अतः कवेरुत्प्रेक्षा[13] ।।७८।।

कराग्रजाग्रच्छतकोटिरर्थी ययोरिमौ तौ तुलयेत् कुचौ चेत् ।
सर्वं तदा श्रीफलमुन्मदिष्णु जातं वटीमप्यधुना न लब्धुम् ।।७९।।

करग्रेत्यादि[1] । ~~[illegible]~~ ययोः कुचयोः कराग्रे जाग्रत् शतकोटिः वज्रं यस्य स तथाविध इन्द्रो अर्थी[2] याचकः [चेत्[3]] यदि श्रीफलं बिल्वफलम् इमौ प्रत्यक्षौ [तौ] कुचौ तुलयेत् कुचाभ्यां समानं[4] भवेत् । तदा सर्वं श्रीफलम्

1 P1 आभ्याम् ; P2 आभ्यामिति । 2 P2 om. हस्तिनः 3 P2 om. लक्ष्मीः 4 P2 न तु ... वदित्याह abt. हस्तिकुम्भौ ... and add. यन्त्तं नाभ्यामिति चैके वाचकम् अर्थान्तरवाच्यगतं प्रत्यक्षविषयोऽपि प्रसौ तत्कथं कल्पनामृत्वाऽऽशीर्वा कुचविषयं पञ्चम्यन्तं व्याचक्ष्यते । 5 P1 P2 च 6 P1 P2 om. अपि तु 7 P1 क्वाऽपि 8 P2 om. यत् 9 P2 add. ताभ्यां कुम्भाभ्यामनयोः कुचयोरसौ श्रीः क्वाऽऽदीयते न क्वचित् । तत्र हेतुर्भयेनेत्यादि । केचित् सा च तयोरिति पाठं पश्यन्तः सन्ति ।।०२ कुम्भाभ्यां ।। P2 om. याभ्यां ... मौक्तिकानि 12 P1 om. तौ 13 P1 इदमनुमानम् ।।७८

1 P1 करा ; P2 करग्रेति । 2 P1 P2 om. याचकः 3 B P1 P2 om. चेत् ; eds. add. चेत्
4 B सामान्यं भवेत्

उन्मदिष्णु उन्मत्तं सगर्वं भवतु। अधुना पुनः कुचाभ्यां हीनत्वे[5] सति वटीमपि लब्धुं न जातम्। कणिकामात्रमपि न लभते। स्तनाग्रो भागः वटी उच्यते। ययोः कुचयोः[6] किल हस्ताग्रे प्रत्यक्षदर्शित-सुवर्णकोटिशतमूल्य[7]दाता अर्थी ग्राहकः। तौ चेच्छ्रिया लक्ष्म्या फलं वस्तु तुलयेत् तुलायां धारयेत् तदा श्रियः फलं सर्वम् उन्मत्तं परं तत्रा[8]ऽस्ति। श्रीफलस्य तु[9] वटीमपि दातुं न कोऽपि अर्थी।[10] अथवा वटीमपि कुचचूचुकमपि लब्धुं तुलयितुं[11] बिल्वं न जातम्। तेनाऽपि साम्यं न लभते[12] ॥७९॥

---

स्तनान्तरे चन्दनपङ्किलेऽस्या जातस्य यावद्युवमानसानाम्। श्रि
हारावलीरत्नमयूखधाराकाराः स्फुरन्ति स्खलनस्य लेखाः ॥८०॥

---

स्तनान्तरे[1] इत्यादि। अस्या दमयन्त्याः[2] चन्दनेनाऽपि[3] पङ्किले कर्दमिले स्तनान्तरे[4] हारावलीरत्नानां मयूखास्तेषां [धाराः] श्रेणयस्तदाकारा, यावन्तो[6]ऽसङ्ख्या युवानस्तेषां मानसानां जातस्य[5] ~~~~ स्खलनस्य[7] लेखाः स्फुरन्ति। यथा पङ्किले प्रदेशे[8] चरणस्खलनरेखाः भवन्ति, तथा दमयन्ती[10] स्तनयोः[9] यूनां मनांसि स्खलितानि पतितानि। अथ च तत्र शोभो

---

5 P, P2 om. स्तनाग्रो ... उच्यते 6 B किल कुचयोः 7 P, °मपि 8 B तन्नाऽस्ति; P2 नास्ति 9 P, om. तु 10 P, om. अथवा .... कुच° 11 P, om. तुलयितुं 12 P, add. अतिशयोक्तिः। शतकोटि श्रीफलमिति च श्लिष्टम् ॥७९॥

1 P, स्तना।; P2 स्तनान्तरे इति। 2 P, P2 om. दमयन्त्याः 3 P, P2 om. अपि 4 P, स्तनातटे 5 P2 जनस्य 6 B मदनस्य; P2 पतनस्य 7 B रेखाः 8 P, पङ्किले तटप्रदेशे 9 P, °स्तनतटे 10 P, P2 लागो

न लब्ध इत्यर्थः" ॥८०॥

---

क्षीणेन मध्येऽपि सतोदरेण यन्नाप्यते नाक्रमणं बलिभ्यः।
सर्वाङ्गशुद्धौ नदनङ्गराज्यविजृम्भितं भीमभुवीह चित्रम् ॥८१॥

---

क्षीणेत्यादि[1]। यन्मध्ये क्षीणेन कृशेनाऽपि सता[2] उदरेण वलिभ्यो वलिमयादाक्रमणं न प्राप्यते। तत्[3] इह भीमभुवि दमयन्त्याम् अनङ्गराज्यस्य कामराज्यस्य विजृम्भितं चित्रम् आश्चर्यकारि। किंभूतायाम्? सर्वेष्वङ्गेषु शुद्धिर्निर्मलत्वं यस्यास्तस्यां[4] तथा। यत्किल उदरेण उदासीनेन मध्ये सता मध्यस्थेन क्षीणेन दुर्बलेनाऽपि बलिभ्यो बलवद्भ्यो नाऽऽक्रमणं प्राप्यते तद्भीमस्य भयानकस्य राज्ञो भुवि भूमौ सर्वेषाम् अङ्गानां राज्याङ्गानां स्वाम्यमात्यादीनां शुद्धौ निर्दोषत्वे चित्रम् आश्चर्यम्। अनङ्गस्याऽङ्गरहितस्य राज्यस्य विलसितम्। यत्र सर्वाङ्गशुद्धिः तत्र कथमनङ्गत्वम्। तथा भीमस्य भुवि[6] अनङ्गस्य कामस्य राज्यं कथं भवति। अन्यभूमौ अन्यराज्याभावात्। तथा योऽनङ्गः तस्य एवंविधः प्रभावः कुतः स्यात्। अतश्चित्रम्[7] ॥८१॥

---

॥ Pi add. इदानीमन्तरे जाताः पर्वताः सरितो द्रुमाः। अनयोर्ग्रामयोरन्तरे तापसः प्रतिवसति। अस्मिन्नन्तरे शीतान्युदकानि इत्यादिषु मध्यवचनत्वेन प्रयुक्तोऽन्तरशब्दः। अत्र हि न तथा चमत्कारोऽस्तीति परीक्ष्यम्। स्तनान्तरेऽन्यत्राऽऽन्तरशब्देन तटमुच्यते। तदुक्तं हैमनाममालायाम्- प्रपातस्त्वतटो भृगुः ( १. ) । तथा च माघः- वधूभिर्नवनदीनामतटोऽपि नवाश्रियारिवाहो इव ( XX.70 )। स्तनान्तरे इति प्राङ् स्तनमध्ये इत्यर्थः। स तु चिन्त्यः। अनुप्रासोऽपह्नुतिः समासोक्तिः ॥८०॥

---

1. Pi क्षीणेन; Pi क्षीणेनेति। 2 Pi add. शोभनेन 3 Pi तत 4 Pi तस्यास्तथाविधा 5 Pi add. अप्रबलेन & and add. उदासीनेन alt. मध्यस्थेन 6 Pi add. कथम्

Contd.

सर्ग ७ 51

मध्यं तनूकृत्य यदीदमीयं वेधा न दध्यात् कमनीयमंशम्।
केन स्तनौ सम्प्रति यौवनेऽस्याः सृजेदनन्यप्रतिमाङ्गदीप्तेः॥८२॥

मध्यं[1] तनूकृत्येत्यादि। यदि अस्या इयम् इदमीयं मध्यम् उदरं तनूकृत्य[2] कृशं कृत्वा वेधाः कमनीयम् अंशं सुन्दरं भागं न दध्यात्। न क्वाऽपि धृत्वा मुञ्चेत्। तदा सम्प्रति यौवने ब्रह्मा केन सौन्दर्यांशेन अस्याः स्तनौ सृजेत्। किंभूतायाः[3]? अनन्यप्रतिमा असाधारणा अङ्गस्य दीप्तिर्यस्याः तस्याः तथा[4]॥८२॥

गौरी च पत्या सुभगा कदाचित् कर्त्रीयमप्यर्द्धतनूसमस्याम्।
इतीव मध्ये निदधे विधाता रोमावलीमेचकसूत्रमस्याः॥८३॥

गौरीवेत्यादि[1]। विधाता अस्याः मध्ये रोमावली एव मेचकं कृष्णवर्णवपुर्विलक्षणं[2] सूत्रं[3] निद(।।3b)धे। कथम्? इतीव[4]। इतीति किम्? इयमपि कदाचिद् गौरी च पार्वती च पत्या सह अर्द्धतन्वाः[5] अर्द्धशरीरस्य समस्यां संक्षेपम् एकशरीरत्वं कर्त्री[6] [करिष्यति। कर्त्रीति पाठे] करोति चेत् तदा[7] अनेन सूत्रेण कुर्स्वेनाऽर्द्धं भवति। यतः सुभगा[8]॥८३॥

contd. below:

1 P. मध्यम। B मध्यमिति। 2 P. add. कृशं कृत्य 3 B किंभूतयोः? 4 P. add. अनुमानम्॥८२॥

1 P. गौरी। B गौरीति। 2 P. ०वर्णं वपुर्विलक्षणं 3 P. om. सूत्रं 4 B om. इतीव 5 B om. अर्द्धतन्वाः 6 B कर्त्री करोति चेत्। कर्त्रीति पाठे कर्त्री करिष्यति। 7 P. यतः सुभगा here 8 B ततः। 9 P. add. अनुप्रास उपमा हेतुउत्प्रेक्षा रूपकं च॥८३॥

contd. अलङ्कारस्य राज्यमपि भीमभुवि। 7 P. add. उदर इत्यस्याप्यल्प इत्यर्थः। तथा च श्रुतिः अथैतस्मिन्नुदरमन्तरं कुरुते (तैउ 2.7) इति। अथ एतस्मिन् ब्रह्मणि उत उदपि अरम् अल्पम् अन्तरं भेदं कुरुते इत्यर्थः। विरोधः समासोक्तिश्च॥८१॥

सर्ग ५ 52

रोमावलीरज्जुमुरोजकुम्भौ गम्भीरमासाद्य च नाभिकूपम् ।
मद्दृष्टितृष्णा विरमेद्यदि स्यान्नैषां व्रतैषा सिचयेन गुप्तिः ॥८४॥

रोमावलीत्यादि[1] । रोमावलीमेव रज्जुम् आसाद्य उरोजौ स्तनावेव कुम्भौ आसाद्य गम्भीरं नाभिमेव कूपम् आसाद्य मम दृष्टे-स्तृष्णा दर्शनेच्छा विरमेत्[2] । व्याङ्परिभ्यो रम (पा० १।३।८३) इति पर-स्मैपदम् । व्रत खेदे । यदि एषां त्रयाणामपि सिचयेन वस्त्रेण गुप्तिः[3] रक्षा आच्छादनं [न] स्यात् । अथ च रज्जुकूपघटप्राप्तौ[4] पिपासा निवृत्तिः । यदि तेषाम्[5]मसीनां खड्गानां चयेन समूहेन गुप्तिः रक्षा न स्यात् । यदा जलस्य अप्राप्तौ खड्गैराकृष्टैर्जलं रक्ष्यते तदा तृष्णा[6] न विरमति[7] ॥८४॥

उन्मूलितालानबिलाभिनाभिश्छिन्नस्खलच्छृङ्खलरोमदामा ।
मत्तस्य सेयं मदनद्विपस्य प्रस्वापवप्रोच्चकुचा वास्तु ॥८५॥

उन्मूलितेत्यादि[1] । सा इयं मत्तस्य[2] मदनद्विपस्य वास्तु[3] शालास्तु । किंभूता ? उन्मूलितं यदालानं गजबन्धनस्तम्भस्तस्य उन्मू बिलं गर्तः छिद्रं तदाभा नाभिर्यत्र सा तथा । छिन्नं स्खलत्[4] पतितं यत् शृङ्खलं त्रुटितं[5] चरणसदृशं तत्सदृशं रोमदाम[6] रोमावली यत्र सा तथा । किंभूता ? प्रस्वापार्थं वप्रं तटं मृत्तिकारूपं[7] तद्वत् उच्चौ कुचौ[8] यत्र सा तथा[9] ॥८५॥

1 P. रोमा ; P2 रोमेति । 2 P2 om. व्याङ् ...पदम् 3 P1 ... गुप्तिं 4 B °समाप्तौ 5 P1 तेषाममसी 6 P1 सानामज 7 P1 add. अनुप्रासो रूपकं श्लेषश्च ॥८४॥
1 P1 उन्मूलिता ; P2 उन्मूलितेति । 2 P2 om. मत्तस्य 3 B वास्तु शालास्तु 4 P1 add. त्रुटितं after शृङ्खलं 5 P1 om. चरणसदृशं 6 B °दामा 7 P1 om. मृत्तिका-रूपं ; P2 मृत्तिकाकूटं 8 P2 om. कुचौ 9 P1 add. अनुप्रासो रूपकं च ॥८५॥

सर्ग ८ 53

[1]रोमावलीभ्रूकुसुमैः स्वमौर्वीचापेषुभिर्मध्यललाटमूर्ध्नि ।
व्यस्तैरपि स्थास्नुभिरेतदीयैर्जैत्रः स चित्रं रतिजानिवीरः ॥८६॥

[2]रोमावलीत्यादि । एतच्चित्रं यत् स [3]रतिजानिवीरः कामः एतस्याः [4]सक्तैः रोमावलीभ्रूकुसुमैरेव स्वमौर्वी च चापं च [6] इषवश्च तै- र्यथासङ्ख्यं मध्ये च ललाटे च मूर्ध्नि च व्यस्तैरपि परस्परं भिन्न- देशस्थैरपि जैत्रः जयनशीलः । किंभूतैः ? [7]स्थास्नुभिः स्थिरत्वादेकत्र [8]मेलयितुमशक्यैः । अत आश्चर्यम् । [9]द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् (पा० II.iv.2) इत्येकवद्भावः । जायाया निङ् [10](पा० V.iv.134) इति निङ्प्रत्ययः ॥८६॥

[1]पुष्पाणि बाणाः कचमण्डनानि भ्रुवौ धनुर्भालमलङ्करिष्णुः ।
रोमावली मध्यविभूषणं ज्या तथाऽपि जेता रतिजानिरेतैः ॥८७॥ /लि

[2]पुष्पाणि बाणा इत्यादि । पुष्पाणि बाणाः अस्याः कचानां [3]मण्डनानि केशेषु स्थिराणि तथा भ्रुवावेव कामधनुर्भालम् अलङ्करिष्णुः । न लोकाव्ययनिष्ठाखलर्थतृनाम् (पा० II.iii.69) इति षष्ठीप्रतिषेधः । रोमावलिरेव ज्या मध्यस्य उदरस्य विभूषणं [4]तथाऽपि रतिजानिरेतैर्जेता [5] ॥८७॥

1 P om. रोमावलि० 2 P. रोमा ।; P रोमेति । 3 B० जानिः 4 B सूक्तैः 5 B स्वमू० 6 P om. च 7 P स्थास्नु० 8 P मेलयित्वाम० 9 P om. द्वन्द्वश्च... निङ्प्रत्ययः । 10 P. समासान्तः सन्च निङ् । त्वादन्तस्य लोपो भवति । लोपो व्योर्वलि (पा० VI.i.66) इति यलोपः । अनुप्रासो रूपकं यथासङ्ख्यं विषमो व्यतिरेकश्च ॥८६॥

1 P om. text & com. 2 P. पुष्पा । 3 B मण्डलानि 4 P. add. मण्डनादीनां विकृतत्वम् । 5 P. add. रूपकं विषमो व्यतिरेकश्च । केचिदिमं श्लोकं न पठन्ति ॥८७॥

अस्याः खलु ग्रन्थिनिबद्धकेशमल्लीकदम्बप्रतिबिम्बवेषात् ।
स्मरप्रशस्ती रजताक्षरेयं पृष्ठस्थलीहाटकपट्टिकायाम् ॥८८॥

अस्याः[1] खल्वित्यादि । अस्याः पृष्ठस्थली एव हाटकपट्टिका तस्याम् [ ] इयं रजताक्षरा रौप्यमयाक्षरा[2] स्मरस्य प्रशस्तिः[3] वर्णनरूपा । कस्मात् ? ग्रन्थौ निबद्धा ये केशा धम्मिल्लप्रायाः तत्र[4] मल्लीकदम्बं विचकिल[5]पुष्पसमूहस्तस्य प्रतिबिम्बवेषात्[6] व्याजात् । श्वेताक्षरेषु पीतवर्णा प्रशस्तिपट्टिका भाति[8] ॥८८॥

चक्रेण विश्वं युधि मत्स्यकेतुः पितुर्जितं वीक्ष्य सुदर्शनेन ।
जगज्जिगीषत्यमुना नितम्बमयेन ~~कि~~ किं दुर्लभदर्शनेन ॥८९॥

चक्रेणे[1]त्यादि । मत्स्यकेतुः कामः अग्रतनेन पितुः[2] श्रीकृष्णस्य सुदर्शनेन नाम्ना चक्रेण[3] युधि विश्वं जितं वीक्ष्य अमुना नितम्बमयेन चक्रेण किं जगज्जिगीषति ? अयं [तु] विशेषः तत्सुखेन[4] दृश्यते । इदं तु दुर्लभदर्शनं[5] दुर्लभं दर्शनं यस्य तेन तथा[6] ॥८९॥

रोमावलीदण्डनितम्बचक्रे गुणं च लावण्यजलं च बाला ।
लावण्यमूर्तेः[1] कुचकुम्भकर्तुर्बिभर्ति शङ्के सहकारिचक्रम् ॥९०॥

1 P. अस्या ; P2 अस्या इति । 2 P. om. रौप्यमयाक्षिरा: 3 P2 om. विसर्ग: M P. बकुल° 5 B विचि° 6 P. ०मिषात् 7 P2 भवति 8 P. add. अनुप्रास[:] सापह्नुतिरुत्प्रेक्षा रूपकं च ॥८८॥

1 P. चक्रेण ; P2 चक्रेणेति । 2 P. श्रीकृष्णस्य पितुः 3 P. add. आयुधेन M P. तत्सुतेन 5 P2 om. दुर्लभदर्शनं 6 P. add. उत्प्रेक्षा व्यतिरेकः सुदर्शनेनेति च श्लिष्टम् ॥८९॥ 1 P2 om. लावण्य°

सर्ग ७ 55

रोमावल्लीत्यादि। इयं बाला लावण्यमूर्तेः कुचयोरेव कुम्भयोः कर्तुः लावण्यस्यैव कुम्भकारस्य सहकारिकारणानाम् असमवायिकारणानां चक्रं समू(।।४ बिहं बिभर्त्ति इति राङ्के। किं किमित्याह— रोमावल्ली एव दण्डः जितम्ब एव चक्रं ते द्वेऽपि तथा गुणं सौन्दर्यादिकं गुणं दोरकं बिभर्ति। लावण्यमेव जलम् ।।१०।।

अङ्गेन केनाऽपि विजेतुमस्या गवेष्यते किं चलपत्रपत्रम् ।
न चेद्विशेषादितरच्छदेभ्यस्तस्यास्तु कम्पस्तु कुतो भयेन ।।११।।

अङ्गेन केनापीत्यादि। अस्याः केनाप्यवाच्येन स्मरमन्दिरलक्षणेन अङ्गेन किं चलपत्रस्य अश्वत्थस्य पत्रं पलाशं विजेतुं गवेष्यते अन्विष्यते। पिप्पलपलाशं कामशास्त्रे वराङ्गस्योपमानम्। चेत् यदि एवं न ततः कुतः कस्माद्भयेन तस्याऽश्वत्थपत्रस्य इतरच्छदेभ्यः अन्यवृक्षपत्रेभ्यः सकाशात् [तु] पुनः विशेषतः कम्पोऽस्तु। वायौ वाति सति विशेषात् पिप्पलपलाशं कम्पते ।।११।।

भृशं चित्रलेखा च तिलोत्तमा स्था नासा च रम्भा च यदूरुसृष्टिः।
दृष्टा ततः पूरयतीयमेकानेकाप्सरःप्रेक्षणकौतुकानि ।।१२।।

1 Ii रोमा; I2 रोमेति। 3 Ii I2 तारुण्य 4 Ii add. एव 5 Ii तारुण्यस्यैव
6 Ii add. रूपकमपह्नुतिरुत्प्रेक्षा। गुणमिति च श्लिष्टम् ।।१०।।
1 Ii अङ्गे; I2 अङ्गेनेति। 2 Ii add. वर्ण्यते। तदुक्तम्— विपुलपिप्पलपत्रसमाकृतेरवयवस्य शिरस्तलमाश्रितम्। सकलकामशिरःसुखचुम्बितं जितदितं मदनातपवारणम्।। ( ) 3 I2 तत 4 I2 om. अन्यवृक्षपत्रेभ्यः 5 B Ii I2 om. तु; edr. add. तु 6 Ii पिप्पलपत्रं विशेषतः 7 Ii add. अनुप्रासोऽनुमानं च ।।११।।

सर्ग ७ — 56

[1]भ्रूक्षिप्तल्लेखेत्यादि। तत: कारणादियम् एकाऽपि दृष्टा सती अनेकासामप्सरसां प्रेक्षणस्य कौतुकानि पूरयति। यतो[2] ऽस्या: भ्रूक्षिप्तल्लेखा नाम देवाङ्गना। अथ च चित्रा रमणीया लेखा रेखा यस्या: सा तथा[3]। [तथाऽस्या नासा नासिका तिलोत्तमा नाम स्वर्गस्त्री। [4]अथ च तिलपुष्पादप्युत्तमा।] [5]अस्या ऊर्वो: सृष्टि: रम्भा नामाऽप्सरस:। अथ च कदली। अतो युक्तम् इयम् अनेकाप्सरसोमयी[6]॥ ९२॥

---

रम्भाऽपि किं चिह्नयति प्रकाण्डं न चात्मन: स्वेन न चैतदूरू।
स्वस्यैव येनोपरि सा ददाना पत्राणि जागर्त्यनयोर्भ्रमेण ॥ ९३॥

---

[1]रम्भापीत्यादि। रम्भाऽपि कदली किमात्मन: प्रकाण्डं स्तम्भखण्डं न चिह्नयति[2] [चिह्नैर्नोपलक्षयति] तथा स्वेनाऽऽत्मना[3] च एतस्या अहम् ऊरू इति च न चिह्नयति [किम्]? येन [सा] रम्भा अनयोरूर्वोर्भ्रमेण[4] भ्रान्त्या स्वस्यैवोपरि पत्राणि ददाना सती जागर्ति स्फुरति। पत्रावलम्बनं किल वादिन उपरि दीयते। [रम्भाया-श्चेति विस्मृतम्[5]। यदहमेव ऊरु:[6]। ततश्च ऊरुभ्रान्त्या कदली स्वोपरि पत्राणि[7] ददाति[8]। अथ च कदल्या: पत्राणि उपरि भवन्ति। उपरि-शब्दस्य[9] छलम्[10]॥ ९३॥

---

1 P. भ्रूक्षि U; P2 भ्रूक्षिप्तेति। 2 P. यद॰ 3 P. vadd. अथवा चित्रस्य रेखा अतिसूक्ष्मा 4 P. अपि तु 5 B तथा 6 P. vadd. अनुप्रासो रूपकं श्लेषो-तिशयोक्तिश्च॥ ९२॥

1 P. रम्भा; P2 रम्भापीति। 2 P. vadd. न जानाति 3 B येनेयं 4 P. om. अनयो: 5 P2 om. ऊरु॰ 6 B कदल्या; P2 om. कदली.... अथ च 7 P. om. पत्राणि 8 B दत्तानि 9 P. शब्दश्च 10 P. vadd. सोत्प्रेक्षमनुमानम्। भ्रान्तिमानतिशयोक्ति:। उपरीति श्लिष्टम्॥ ९३॥

सर्ग ७ 57

विधाय मूर्धानमधश्चरं चेन्मुञ्चेत्तपोभिः स्वमसारभावम्।
जाड्यं च नाञ्चेत् कदली बलीयस्तदा यदि स्यादिदमूरुचारुः॥ ९४॥

विधायेत्यादि। चेत् यदि कदली अधश्चरं मूर्धानं विधाय तपोभिः स्वमसारभावं [निःसारभावं] मुञ्चेत्। तथा यदि बलीयः प्रबलं जाड्यं जडत्वं शैत्यं न अञ्चेत् [न] प्राप्नुयात्। तदा यदि इदमूरुचारुः स्यात्। अस्या ऊरू इदमूरू तद्वत् चारुः चापि कदली यदि कथञ्चित् स्यात्। तदूरू संसारे निरन्तरशीतलत्वि-त्वजडत्वरहिते च। यः किल गाढं तपः कुरुते, स उपरिचरणः अधोमस्तकः तपस्यति॥ ९४॥

ऊरुप्रकाण्डेन खलु प्रियायाः करः पराजीयत वारणीयः।
युक्तं ह्रिया कुण्डलनच्छलेन गोपायति स्वं मुखपुष्करं सः॥ ९५॥

ऊरुप्रकाण्डेनेत्यादि। खलु प्रियायाः ऊरुप्रकाण्डेन ऊरुदण्डेन वारणस्य हस्तिनः [अयं वारणीयः] करः शुण्डादण्डः पराजीयत। अथ वारयतीति वारणः तत्सम्बन्धी वृद्धाच्छः (पा० IV. ii. 114) इति [छ] प्रत्ययः। ईय। ततो युक्तं स करः स्वं स्वं मुखपुष्करम् अग्रं ह्रिया लज्जया गोपायति रक्षति। न दर्शयति। केन? कुण्डलनच्छलेन॥ ९५॥

1 B2 स्त्र.... नमद० 2 B2 विधायेति। 3 P1 जलत्वं 4 B2 om. विसर्ग 5 B असारे, P1 संसारे 6 B शीतलत्वात् च रहिते 7 P1 अधोमस्तक उपरि० 8 P1 add. अतिशयोक्तिः। इदुरस्योत्प्रेक्षाचोपमा। अद्भुतोपमेति दण्डी॥ ९४॥ 1 P1 ऊरु, B2 उर्विति। 2 B वारु० 3 B2 om. अयं वारणीयः 4 P1 add. प्रशंसावचनैश्चे(पा० II. i. 66) इति तत्पुरुषः समासः 5 B2 om. वृद्धा०... ईय 6 P1 आयनेयीनीयिय (पा० VII. i. 2) इत्यादिना ईय 7 B2 सं० 8 P1 मुखस्य 9 P1 add. उत्प्रेक्षाऽपह्नुतिः समासोक्तिश्च॥ ९५॥

सर्ग ७ 58

अस्यां मुनीनामपि मोहमूहे भृगुर्महान्यत्कुचशैलशीली।
नानारदाह्लादि मुखं श्रितोरुर्व्यासो महाभारतसर्गयोग्यः ॥९६॥

[2]अस्यामित्यादि। अहमस्यां विषये मुनीनामपि मोहमूहे वितर्कयामि। मुनयोऽपि मूढाः। यस्याः कुचौ एव शैलौ तौ शीलयते सेवते। महान् [भृगुर्महात्मा] भृगुर्मुनिः।[4] अथ च भृगुस्तटं कुचौ परिचिनोति। [5]महान्॥ (Mb) न तत्सदृशत्वात्। मुखं न अनारदाह्लादि[6] अपि तु नारदं मुनिमाह्लादयति। अथ च नानाप्रकारै रदैर्दन्तैराह्लादयति। व्यासः श्रीकृष्णद्वैपायनः श्रिते ऊरू येन स तथा। किंभूतः? श्रीमहाभारतस्य सर्गयोग्यः। अथ च व्यासो विस्तारः श्रितोरुः। किंभूतः? [महाभा] महती भा दीप्तिर्यस्याः[सा] महाभाः। तथा रतसर्गस्य सुरतप्रवृत्तेर्योग्यः[7] ॥९६॥

क्रमोद्गता पीवरताधिजङ्घं वृक्षाधिरूढं विदुषी किमस्याः।
अपि भ्रमीभिस्त्रिभिरावृताङ्गं वासो लतावेष्टितकप्रवीणम् ॥९७॥

[1]क्रमोद्गतेत्यादि। किम् [2]अस्या अधिजङ्घं क्रमेण उद्गता[3] ऊर्ध्वं गता [4] [अधिजङ्घं कृता क्रमेण कृतवेष्टना च] पीवरता वृक्षाधिरूढं [नामाऽस्ति ज्ञानविशेषः] तद्विदुषी॥ किं तज्जानाति[5]। वृक्षोऽपि लतया आक्रान्तो वेष्टितः[6] वृक्षाधिरूढो भवति।[7] तथा वासो वस्त्रमपि

1 B ~~+~~ ~~odd~~ 2 P. अस्यां (स्याम); B2 अस्यामिति। 3 B अस्यां विषयेऽहं 4 P. add. महान् 5 P. om. महान् 6 P. ह्लादयति 7 P. add. अनुप्रास उत्प्रेक्षा श्लेषश्च ॥९६॥

1 P. क्रमो; B क्रमोद्गतेति। 2 B तस्या 3 B om. उद्गता 4 B गता ~~B~~ वेष्टना च 5 B न 6 B ०तत्वा० 7 P. add. वृक्षाधिरूढमिति पाठान्तरम्।

लतावेष्टितकं] नामाऽऽलिङ्गनं [तत्र प्रवीणाम् । किंभूतम्? । भ्रमीभङ्गिभिरावृताङ्गाम् । यथा लता भ्रमन्ती भ्रमन्ती वृक्षं वेष्टयति । तादृशम् आलिङ्गनम्] वासोऽपि भ्रमीभिर्गात्रं वेष्टयति । देशविशेषेषु तथा परिधीयते वस्त्रं [लतावेष्टितमिव][4] ॥९७॥

---

अरुन्धतीकामपुरन्ध्रिलक्ष्मीजम्भारिबिम्बाधरनर्वाम्बिकानाम् ।
चतुर्दशीयं तदिहौचितैव[1] गुल्फद्वयाप्ता यदहृश्यसिद्धिः ॥९८॥

---

4. लतावेष्टितकम् । and add. प्राकृतौ कन् । अनयोश्च लक्षणं रतिरहस्ये प्रतिपादितम् । यथा — रमणचरणमेकेनाङ्घ्रिणाऽऽक्रम्य खिन्नः श्वसितमपरपादेनाऽऽश्रयन्ती तदूरुम् । अथ निजभुजमेकं पृष्ठतोऽस्याऽर्पयन्ती पुनरपरभुजेन प्राञ्चयन्ती तदंसम् ॥ रति० प्र० ६ ॥ तरुमिव कामितारं चुम्बनार्थं यिरोढुं यदभिलषति नारी तच्च वृक्षाधिरूढम् । प्रियमनुकृतवल्लीविभ्रमा वेष्टयन्ती द्रुममिव सरलाङ्गी मन्दशीत्का तदीयम् ॥ प्र० ७ ॥ वदनमुदितखेदा कन्दना चुम्बनार्थं नमयति विनताङ्गी यल्लतावेष्टितं तत् । प्र० ५ ॥ तथा च वात्स्यायनीये कामशास्त्रे साम्प्रयोगे द्वितीयेऽधिकरणे द्वितीयेऽध्याये आदितः सप्तमे — चुम्बनादीनामालिङ्गनपूर्वकत्वात् प्रथमोपदिष्टे कालरूपविशिष्टेष्वालिङ्गनविचारेष्वष्टमे प्रकरणे यथा — लतारिवालमावेष्टते, तद्वन्नायिका नायकमूर्ध्नि स्थितमभिमुखं कक्षयोर्वै कक्षयोः कण्ठे बाहुप्रतिलताभ्याम् आवेष्टते । तत्र च नायिकाऽत्र प्रयोक्त्री । अस्य च चातुर्विध्यं चुम्बनम् । अपरं च कलम् । रागजननं वर्धनं मौलम् । स्वेन चरणेन चरणं नायकस्याऽऽक्रम्य द्वितीयेन चरणेनोरुदेशमित्यादिहाभ्यां तु पदाक्रमणमूर्वोर्वेष्टनं च तदुभयमपि वृक्षाद्यधिरूढमत्रैवाऽन्तर्गतमित्यादि दर्शितम् । उत्प्रेक्षा श्लेषोऽपि ॥९७॥

1. Read ०चौचितीत्यं ——

सर्ग ८ 60

अरुन्धतीत्यादि। इयम् अरुन्धत्याः कामपुरन्ध्रेः रतेः लक्ष्म्याश्च जम्भद्विषतो दारा इन्द्राणी तथा नवाम्बिकास्तासां सर्वासां दुर्गाणां च इयं चतुर्दशी चतुर्दशानां पूरणी। [त्रयोदश] एताः स्त्रियः। एतासां [सकलगुणैरियं सदृशी। तदिह]ऽस्यां विषये उचिता एव अदृश्यसिद्धिः यत गुल्फद्वयेन आप्ता। गुल्फौ मग्नौ वर्णनीयौ। अतश्च न दृश्यौ। चतुर्दश्यां किलाऽदृश्यासिद्धिः साधकानाम् ॥९८॥

अस्याः पदौ चारुतया महान्तावपेक्ष्य सौक्ष्म्याल्लवभावभाजः।
जाता प्रवालस्य महीरुहाणां जानीमहे पल्लवशब्दसिद्धिः॥९९॥

अस्या[ः] पदावित्यादि। वयं जानीमहे महीरुहाणां वृक्षाणां प्रवालस्य पल्लव इति शब्दस्य सिद्धिः प्राप्तिर्जाता। लब्धिरिति पाठान्तरम्। किं भूतस्य? अस्याः [चारुतया महान्तौ] पदौ चरणावपेक्ष्य लवभावं लेशभावं भजते। कस्मात्? सौक्ष्म्यात्। पदो लवः पल्लवः। दमयन्तीचरण[ले]शमात्रमल्पत्वेन सूक्ष्मत्वम् ॥९९॥

जगद्वधूमूर्द्धसु रूपदर्पाद्यदेतयाऽदायि पदारविन्दम्।
तत्सान्द्रसिन्दूरपरागरागैर्ध्रुवं प्रवालप्रबलारुणं तत् ॥१००॥

जगदित्यादि। यत एतया जगतो वधूनां मूर्द्धसु

2 P2 इन्द्राण्या; B P1 तस्या M P1 P2 नवानामम्बिकानां 5 P1 अथ च 6 B सदृशौ; P2 ऽदृशौ 7 P1 add रूप[को] हेतुरपि॥९८॥ 1 P2 text लब्धिः 2 P1 अस्या॥; P2 अस्या इति 3 B II P2 पादौ; edn. पदौ M P1 add अणुभावं M B सौख्यभाक्। कस्मात्? 5 P1 पादो 6 P1 add पादः समानार्थः पल्लवः। उत्प्रेक्षाऽतिशयोक्तिश्च॥९९॥ 1 P2 text ऽधायि 2 P1 जगद्वधू; P2 जगदिति। 3 P1 जगद्वधू

पदारविन्द[4] [रूप]स्य दर्पाद् अदायि। तत्तस्मात्कारणात्तेषां वधूमस्त-
कानां सान्द्रैः सीमन्तसिन्दूर[पराग]स्य [रागैः] तत्पदद्वयं प्रवालवत्
प्रबालं[5] गाढमरुणम्[6] ॥१००॥

रुषारुणा सर्वगुणैर्जयन्त्या भैम्याः पदं श्रीः स्म विधेर्वृणीते।
ध्रुवं स तामच्छलयद्यतः सा भृशारुणैतत्पदभाग्विभाति ॥१०१॥

रुषेत्यादि[1]। भैम्याः पदं स्थानं विधेः सकाशात् रुषा[2]
अरुणा सती श्रीर्लक्ष्मीर्वृणीते स्म। दमयन्त्या[3] अतिसुन्दरीत्वात्। श्रियः
कोपः मां[4] भैमीस्थाने कुरु। स ब्रह्मा ध्रुवं तां श्रियम् अच्छलयत्। यतः
कारणात् सा श्रीर्भृशारुणं यत् तस्याः पदं चरणः तं भजते एवंविधा
विभाति[6]। अथ च[7] भृशारुणा एतत्पदभाग्विति भिन्ने पदे, तया अरुणा-
या सत्या पदं स्थानं याचितम्। ततः स्थानं न दत्तं, चरणो दत्तः छलेनेति[8] ॥१०१॥

यानेन तन्व्या जितदन्तिनाथौ पादाब्जराजौ परिशुद्धपार्ष्णी।
जाने न शुश्रूषयितुं स्वमिच्छू नतेन मूर्ध्ना कतरस्य राज्ञः ॥१०२॥

यानेनेत्यादि[1]। अहमिति न जाने। यत् तन्व्याः पादावेवा[2]-
ब्जराजौ पद्मसम्राजौ कतरस्य राज्ञः मूर्ध्ना[3] स्वमात्मानं शुश्रूषयितुमिच्छू।
अस्याः पदयोः को राजा पतिष्यतीति न[4] जाने। किंभूतौ। यानेन गमनेन

4 B P1 पादा० 5 B P2 प्रबालं 6 P1 add: प्रवालः पल्लवो विद्रुमश्च। अनु-
प्रासो हेत्वतिशयोक्तिः ॥१००॥

1 P1 रुषारुणे; P2 रुषेति 2 P1 add: कोपेन 3 B दमयन्ती 4 P1 भैमीस्थाने
मां 5 P1 om. तां 6 P1 भवति 7 P1 वा 8 P1 add: उत्प्रेक्षा ॥१०१॥

1 P1 याने; P2 याने इति 2 B P2 पदा० 3 B P2 मूर्ध्ना 4 P1 om. न

कृत्वा जितो दन्तिनाथो[5] याभ्यां तौ तथा। गजपतित्वात्। तथा परि-शुद्धे पार्ष्णी[6] ययोः तौ तथा। अथ च यो राजा यानेनैव प्रयाणेन[6] दन्तिनाथं गजपतिं[7] राजानं जयति, तथा प्रयाणे परिशोधितः[8] वशीकृतः पार्ष्णिभूतो राजा येन, स कश्चिद्राजानं स्वचरणयोः पातयितु(॥५९)-मिच्छति। तन्न ज्ञायते[9] ॥१०२॥

कर्णोऽपि दन्तच्छदबाहुपाणिपादादिनः स्वाखिलतुल्यजेतुः।
उद्वेगभागद्वयताभिमानादिहैव वेधा व्यधित द्वितीयम् ॥१०३॥

कर्णोऽपीत्यादि[1]। वेधाः[2] कर्णस्याऽङ्गस्य[3] दन्तच्छदस्य ओष्ठस्य[4] बाहोः पाणेः पादस्य[5] च इत्येवमादेरवयवस्य द्वितीयं वस्तु कर्णादिकं पश्चाद्व्यधित। किंभूतः? अद्वयतायाः अभिमानात् उद्वेगभाक्। यथा यथा[7] तेषां सौन्दर्याद्वैताहङ्कारः, तथा तथा ब्रह्मणो महानुद्वेगः। तत इहैवाऽस्यां[8] दमयन्त्यां तस्य तस्य द्वितीयमकृत। किं विशिष्टस्य? स्वस्याऽऽत्मनोऽखिलं[9] तुल्यं[10] पद्मादिकं तत् जेतुः जयनशीलस्य कर्णादेः[11] ॥१०३॥

तुषारनिःशोषितपद्मसर्गं विधातुकामस्य पुनर्विधातुः।
पञ्चास्विहाऽस्याङ्घ्रिकरेष्वभिख्याभिक्षाऽधुना माधुकरीसदृक्षा ॥१०४॥

5 I. vadd. विशिष्टः कश्चिद् गजः ऐरावत इव 6 I. vadd. इव 7 I. vadd. सौडेश्वरं 8 B पातितु 9 I. vadd. अनुप्रासो रूपकं श्लेषश्च ॥१०२॥
1 I. कर्णा; I₂ कर्णेति। 2 I. om. वेधाः 3 I. अङ्गस्य दन्त० M I₂ add. च 5 I₂ पदस्य 6 I. om. पश्चात् 7 I₂ om. यथा 8 I₂ यस्यां 9 I₂ om. स्वस्य 10 I. om. तुल्यं 11 I. vadd. व्यतिरेकः काव्यलिङ्गं पर्यवसितोऽन्वयश्च ॥१०३॥

तुषारनिःशोषित[1]मित्यादि। अधुना विधातुः तुषारेण हिमेन निःशोषितं [ध्वस्तम्] अब्जानां कमलानां सर्गं सृष्टिं पुनरपि विधातुकामस्य पञ्चसु आस्ये अङ्घ्र्योः करयोश्च विषये [या] अभिख्याया[2] [3]कान्तेः भिक्षा [4]याच्ञा सा माधुकरी नाम पञ्च-गृहभिक्षा संन्यासिनां, तस्याः सदृक्षा। [5]यथा मधुकरः पुष्पेषु रसं गृह्णाति, तथा अपीडयन् [6][यतिः] भिक्षामादत्ते[7] ॥१०४॥

एष्यन्ति यावद्गणनाद्दिगन्तान्नृपाः स्मरार्ताः शरणे प्रवेष्टुम्।
इमे पदाब्जे विधिनाऽपि सृष्टास्तावत्य एवाङ्गुलयोऽत्र रेखाः ॥१०५॥

एष्यन्तीत्यादि[1]। विधिना[1] अपि नु वितर्के। तावत्य एव अङ्गुलयो रेखाः किं सृष्टाः। यावद्गणनात् यावत्सङ्ख्यात् दिगन्तात्[2] स्मरेण आर्ताः सन्तो[3] नृपा इमे पदाब्जे द्वे अपि चरण-कमले [शरणे][4] प्रवेष्टुमेष्यन्ति[5]। दश दिशो[6] दशाऽङ्गुलय एव अत्र रेखाः[7] ॥१०५[8]॥

प्रियानखीभूतवतो यदेदं व्यधाद्विधिः साधुदशत्वमिन्दोः।
एतत्पदच्छद्मसरागपद्मसौभाग्यभाग्यं कथमन्यथा स्यात् ॥१०६॥

1 B तुषारविश्लेषित°; P₁ तुषारा; P₂ तुषारेति। 2 P₁ आख्यायाः 3 P₁ add. शोभायाः 4 P₁ add. या 5 P₁ add. यथा — काप्यभिख्या तयो-रासीद् (रघु° I. 46) इति। तथा — काप्यभिख्या(ख्या) विरजसोः सूर्या-चन्द्रमसोरभूत्। दाशरथ्योस्तथैवासीद्योगोपहिता शुचिः ॥ ( ? ) इति च प्रयोगः। 6 P₂ अति। 7 P₁ add. अभिख्या नामशोभयोः (अमर° III. 156) कीर्तौ च। अनुप्रास उपमा च ॥१०४॥ ‖ 1 P₂ विधुना 2 P₂ गुणना यत्सङ्ख्याका दिगन्ता° 3 B सतो 4 P₁ शरणे 5 B इच्छन्ति 6 P₁ P₂ दिशः 7 P₁ add. अत्र रेखा इति पाठान्तरम्। उत्प्रेक्षा ॥ 8 P₂ 103.

प्रियेत्यादि। विधिर्यद् प्रियायाः नखीभूतवत इन्दोः साधु सम्यक् दशात्वं[1] व्यधात्। [2]इत्थं साध्वी दशाऽवस्था यस्य स साधुदशः तस्य भावस्तत्त्वं व्यधात्। रुचिरावस्थात्वं व्यधात्। साधुशब्दत्वमित्यावृत्त्या[3] व्याख्येयम्। यदेदमिति च पूर्ववाक्ये यच्छब्दः तदपेक्षया[4] उत्तरवाक्ये इदंशब्दः। [मुदेदमिति पाठे[5] दैवरक्ता किंशुका:।][6] कथमन्यथाऽस्य एतस्याः पदयोर्नखेना यत् /एकं सताणां पद्मं तत्र सौभाग्यं[7] प्रीतिस्तस्य भाग्यम्[9]। इन्दोः पद्मेन सह प्रीतिः। एतत् साधुदशाभावे कुतः॥[8]॥१०६॥

---

यशः पदाङ्गुष्ठनखौ मुखं च बिभर्ति पूर्णेन्दुचतुष्टयं या।
कलाचतुःषष्टिरुपैतु वासं तस्यां कथं सुभ्रुवि नाम नास्याम्॥१०७॥

---

यश इत्यादि। या यशः चन्द्रं पदाङ्गुष्ठनखौ[1] चन्द्रौ मुखं चन्द्रम् इत्थं पूर्णेन्दु च चतुष्टयं बिभर्ति। तस्यां सुभ्रुवि कथं नाम कलानां चतुःषष्टिः कलाचतुःषष्टिर्वासं[2] न उपैतु। एकैकस्मिन् चन्द्रे षोडश कलाः[3]। अथ च कला नृत्यगीतादिकाः [वात्स्यायनीयकामशास्त्रे सांप्रयोगिके द्वितीयेऽधिकरणे प्रथमाध्याये प्रमाणभावकालेभ्यो[4] रतमवस्थाप्य कालस्वरूपाभ्यां प्रीतिं व्यवस्थाप्य तत व्यतिरेकेण अन्यांश्च[5] प्रीतिविशेषानुक्त्वा संप्र-

---

1 B. add. दशासद्भुतत्वं 2 B. om. इत्थं.... व्यधात् 3 B. ०मित्याख्येयम् 4 B. तदपेक्षय 5 B. add. एकत्र वाक्ये 6 B. add. तदा च एकवाक्यत्वम् (ले) 7 B. प्रति तस्य 8 B. add. अनुप्रासः। श्लेषोऽनुमानमतिशयोक्तिश्च। 9 B. 1,04. — ॥३०४॥

---

1 B. पद्मा० 2 B. om. कलाचतुःषष्टिः 3 B. om. सां० 4 B. प्रणाम० 5 B. कन्याश्च

योगाङ्गमित्यादिना द्वितीयाध्यायादौ निर्दिश्य[6] पाञ्चालिकी चतुः-
षष्टिरुक्ता। साधारणे च[7] प्रथमेऽधिकरणे विद्यासमुद्देशे तृतीये
प्रकरणे तृतीयाध्याये प्रपञ्चितमिदम्। शास्त्रान्तरे त्वे चतुःषष्टि-
मूलकला उक्ताः।

तत्र कर्माश्रयाश्चतुर्विंशतिस्तद्यथा – नृत्यं, गीतं,
वाद्यं,[8] लिपिज्ञानं, वचनकौशलं, चित्रविधिः पुस्तकर्म, पत्रच्छेद्यं,
माल्यविधिः,[9] आस्वाद्यविधानं, रत्नपरीक्षा,[10] सीव्यं, रञ्जनज्ञानम्[11],
उपकरणक्रिया, [मानविधिः], आजीवज्ञानं, तिर्यक्योनिचिकित्सितं,
मायाकृतं पाषण्डसमयज्ञानं, क्रीडाकौशलं[12] [लोकज्ञानं], वैचक्षण्यं,
संवाहनं[13], शरीरसंस्कारः विशेषकौशलं[14] चेति। द्यूताश्रया[15] विंशति-
श्चेति। तत्र निर्जीवाः पञ्चदश तद्यथा – आयुःप्राप्तिः[16], अक्षविधानं,
रूपसङ्ख्या, क्रियामार्गणम्[17], बीजग्रहणं, नयज्ञानं, करणादानं, चित्राचित्र-
विधिः, गूढराशिः, तुल्याभिहारः, क्षिप्रग्रहणम्, अनुप्राप्ति[18]लेखस्मृतिः[19],
अग्निक्रमः, छलव्यामोहनं, ग्रहदानञ्चेति। सजीवाः पञ्च तद्यथा
– उपस्थानविधिः, युद्धं, रुतं[20], गतं, नृत्तं चेति। शयनोपचारिका षोडश
तद्यथा – पुरुषभावग्रहणं, स्वरागप्रकाशनं, [प्रत्यङ्गदानं], नखदन्तयो-
र्विचारौ, नीवीस्रंसनं, गुह्यस्य संस्पर्शानुलोम्यं, परमार्थकौशलं,
हर्षणं, समानार्थता कृतार्थता, अनुप्रोत्साहनं, मृदुक्रोधप्रवर्तनं,
[सम्यक्क्रोधनिवर्तनं], क्रुद्धप्रसादनं, सुप्त[21]परित्यागः, चरमस्वाप-
विधिः, गुह्यगूहनमिति। चतस्रः उत्तरकलाः यथा – साश्रुपातं

---

R2 add. नाट्यं 9 R1 add.
6 R1 निर्विश्य 7 R1 om. च 8 R1 गन्धयुक्तिः; R2 ०युक्तिः 10 R2 स्वाप्यं 11 Oxf. रङ्ग० 12 R2 ०कौशलकं 13 R1 संवाहकं 14 R2 कौशल्यं 15 R2 om. द्यूताश्रया विंशतिश्चेति। 16 R1 आयःप्राप्तिः; R2 आयासस्तोष्यं and read अक्षविधानं... तद्यथा पुरुषभा० under VII.104. 17 R1R2 विमर्शः 18 R1R2 अन्तःप्राप्तिः 19 R1R2 ०स्मृत्यनु० 20 R1R2 नस्तं 21 R1R2 सुप्ता०

रमणस्य शापनं, स्वशपथक्रिया[22], प्रस्थितानुगमनं, [पुनः] पुनर्निरीक्षणं चेति चतुःषष्टिर्मूलकला[ः]। आस्वेवाऽन्तरनिविष्टानाम्[23] अन्तरकलानाम् अष्टादशाधिकानि पञ्चशतान्युक्तानि][24] ॥१०७॥[25]

सृष्टाऽतिविश्वा विधिनैव तावत्तस्याऽपि नीतोपरि यौवनेन।
वैदग्ध्यमध्याप्य मनोभुवेयमवापिता वाक्यथपारमेव ॥१०८॥

[1]सृष्टेत्यादि। तावत् विधिनैव इयं दमयन्ती विश्वमतिक्रान्ता अतिविश्वा[2] सृष्टा। यौवनेन तस्याऽपि विश्वजयस्याऽपि उपरि सौन्दर्यान्नीता[3]। अमुना[4] मनोभुवा इयं वैदग्ध्यं दक्षतामध्याप्य वाक्यथस्य पारमेव अवापिता। सौन्दर्ये वचनस्याऽविषयमेव गमिता[5] ॥१०८॥

इति स चिकुरादारभ्यैनां नखावधि वर्णयन्
हरिणरमणीनेत्रां चित्राम्बुधौ तरदन्तरः।
हृदयभरणोद्वेलानन्दः सखीकृतभीमजा—
नयनविषयीभावे भावं बभार भुवो विभुः ॥१०९॥

इति स इत्यादि। स भुवो विभुः सखीकृताया भीमजाया नयनविषयीभावे भावम् अभि(२५६)प्रायं बभार[1]। दमयन्ती मां पश्यतु इति भावं दधौ। किं कुर्वन्? एनां [ हरिणरमणी—

22 P/2 स्वयं 23 P/2 आस्वेवं ते निर्विष्टा० 24 P add. अतिशयोक्तिश्लेषश्च। 25 P/2 105 — ॥१०७॥
1 B स्पष्टे० 2 P/2 अतिविश्वं 3 P/2 ०दुपनीता 4 P/2 अधुना 5 P/2 add. अस्याश्चातुर्यं वक्तुं न शक्यते। 6 P/2 106 — ॥१०८॥ 1 P add. दधार —

सर्ग ७ 67

नेत्राम्। सप्तम्युपमानपूर्वस्योत्तरपदलोपश्च (वा॰ under पा॰ II.ii.24) इति बहुव्रीहि-रुत्तरपदलोपश्च]॥ इति चिकुरात् केशात् आरभ्य नखावधि वर्णयन्। किंभूतः॥ चित्राम्बुधौ आश्चर्यसमुद्रे तरत् अन्तरं यस्य स तथा। पुनः किंभूतः॥ हृदयभरणेन उद्वेलः असमर्थाद् आनन्दो यस्य स तथा। आनन्दो हृदयं भृत्वा उद्वेलितः। इत्यानन्दाऽक्रम। हरिणरमणीत्युप-श्लेषेण हरिणीवृत्तमपि सूच्यते॥१०९॥

---

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
गौडोर्वीशकुलप्रशस्तिभणितिभ्रातर्ययं तन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽगमत्सप्तमः॥११०॥

---

श्रीहर्षमित्यादि। तस्य कवेर्महाकाव्ये सप्तमः सर्गोऽगमत् समाप्तः। किंभूते॥ गौडोर्वीशस्य गौडदेशनृपतेः कुलस्य या प्रशस्ति-वर्णना तत्र या भणितिरुक्तिः तस्याः भ्रातरि। सोऽपि प्रशस्तिरनेन कृतेत्यर्थः॥११०॥

---

इति धवलकवास्तव्य-महापण्डितश्रीचाण्डू-विरचितायां नैषधटीकायां सप्तमः सर्गः समाप्तः
[दीपिकायां]

---

2 I. सप्तम्यु॰...त्पदलोपश्च at the end. 3 B आश्चर्ये तरत् 4 B ॰तरणेन 5 B उत्कर्ष 6 I. हृदये 7 B ॰रमणीचतुष्टय॰ 8 B हरिणीप्राप्तिः and add portion of VII.107 9 B ॰वृत्तमित्यपि 10 I add अनुप्रास उपमाऽतिशयोक्तिश्च॥१०९॥ 1 B काव्ये 2 B om. गौडदेश॰ 3 B यापत 4 B तयास —॥११०॥ 1 I. om. धवलकवास्तव्य॰ 2 B om. इति...सर्गः। 3 I om. समाप्तः।

* ori. सप्तम्युपमानपूर्वपदस्य बहुव्रीहिरुत्तरपदलोपश्च।